RSVL
15744

॥ श्रीः ॥

॥ ओन्नमःपरमात्मने ॥

श्रीवाल्मीकिरामायणकथानुपूर्वीसहितः

युद्धकांडकथास्तुत्याख्यो ग्रंथः ॥

श्रीशृङ्गगिरिमठस्थव्याख्यान सिंहासनाधीश्वराणां श्रीसच्चिदानन्द-
शिवाभिनव नृसिंहभारतीस्वामिनां तच्छिष्य, श्रीचन्द्रशेखर
भारतीस्वामिनांच पदसरसिज चञ्चरीकायमाणस्वांतेन तत्कृपा
वीक्षणकण समासादित सरस्वतीप्रसाद विशदमतिना

श्रीरामानन्दसरस्वत्याख्ययतिना

विरचितः

श्रीलैप्पुळ्ळैयार्पुत्तूर्ग्रामस्थ रामकृष्णशास्त्रि प्रेषितेन, कोटिमङ्गळ
ग्राम महाजन प्रेषितेन, तद्ग्राम पश्चिमभागस्थ कोदण्ड रामः
स्वामिसन्निधिस्थ, मेलहलं कण्णामङ्गलाग्रहारस्थ महाजन
प्रेषितेनच द्रव्येण,

कुम्भघोणस्थ श्री जनार्दनाख्य मुद्रणालये मुद्राप्य, श्रीविद्यामुद्रालयेच

प्रजोत्पत्तिसंवत्सर माघमास शुक्लद्वितीयायाम् ॥

प्रकाशितो विजयतेतमाम् ॥

एतस्यमूल्यम्] [०—८—०

॥ श्रीः ॥

ओं श्रीगणेशाय नमः ।

श्रीशारदांबिकायै नमः ।

श्रीगुरुभ्यो नमः ।

युद्धकाण्डकथास्तुतिर्लिख्यते ॥

प्रदक्षिणीकृत्यगिरीशमेव यः फलंप्रपेदे शिखिवाहदुर्ळभम् ।
तमादरान्नौमि हिमाद्रिजासुतं विदेहजाभर्तृकथाप्रपूर्तये ॥

देवि त्वां भुवनेश्वरीं हृदि सदा सञ्चिन्तयाम्यन्वहं
त्रैलोक्येपिच ते यतस्सुविदितं भक्तार्तिसंछेदनम् ।
मुक्त्वा त्वामपि तादृशीं भगवतीं किन्वाश्रयेन्मेमन ।
स्तस्मान्मामव वाणि पद्मजनुषः कान्ते नताभीष्टदे ॥

यो रामभक्तस्सहि देवरूपस्सेव्यो जनानां भवतीतिवार्ताम् ।
श्रुत्वाऽहमद्यप्रभृतिस्वजन्मापायाय रामं शरणं गतोऽस्मि ॥

रत्नगर्भगणेशानं शारदां चन्द्रशेखरम् ।
नत्वा रामस्तुतिं कुर्वेमद्व्याधिविनिवृत्तये ॥

नौमि श्रीसच्चिदानन्दशिवाभिनवपूर्वकान् ।
नृसिंह्मभारतीसंज्ञान् सच्छिष्यसहितानहम् ॥

युद्धकाण्डकथास्तोत्रं लिखितुं ग्रन्थरूपतः ।
रामभक्तैस्सदावन्द्यं हनूमन्तमुपासहे ॥

अयश्चपट्टाभिषेकालंकृतो युद्धकांडः ।

श्रीरामचन्द्राय नमः ।

॥ अथ कथास्तुतिप्रारंभः ॥

श्रुत्वाहनुमद्वचनं यस्तंप्रत्युत्तरंतदाऽभाणीत् । कृतकार्यं पवनसुतं तमहं सीताधवं भजेरामम् ॥१॥ दुष्करमपि कार्यंयो भर्त्राऽऽज्ञप्तः करोतिसश्लाघ्यः । इतियोदूतमभाणीत्तमहंसीताधवंभजे रामम् ॥२॥ भर्त्रोक्तंसाधयितुं शक्तियुतं तं तु मध्यमंप्राहुः । इतियोदूत * रामम्॥ ॥ ३ ॥ भर्तुः कार्यं स्वधिया कर्तुमयोग्यं तमाहुरधमं ज्ञाः । इतियो दूतम * रामम् ॥४॥ अद्यरघुवंशवृद्धिः सीतासन्दर्शनेनविहिताऽभूत्। इतियोदूत * रामम् ॥ ५ ॥ अद्यपरिष्वंगमिमं मद्त्तंत्वं गृहाणपवनजने । इति तं योऽस्वजत मुदातमहं सीताधवं भजे रामम् ॥ ६ ॥ हरयोजलधिमपारं हनुमन्कथमद्यसन्तारिष्यन्ति । इति तं यस्समपृच्छत्तमहं सीताधवंभजे रामम् ॥ ७ ॥ अथकपिपतिरूचेगां प्राकृतवत्त्वं किमर्थमनुवदसि । इतिं यं चञ्चलधिषणं तमहंसीता * रामम् ॥८॥ त्यजबुद्धिमिमां कृपणामुत्साहवतोहिकार्यसिद्धिस्स्यात्। इतियं कपिपतिरभणत्तमहं सीता * रामम् ॥९॥ कपयस्सर्वे शूरास्तीर्त्वाऽब्धिरावणं विजेतुमलम् । इतियंकपिपतिरभणत्तमहं सीता * रामम् ॥ १० ॥ अब्धौसेतुमबध्वा लङ्काशक्यानमर्दितुं शूरैः । इतियंकपिपति*रामम्॥ ॥ ११ ॥ सेतुर्यदिबद्धोब्धौ कपयो लङ्कां क्रुधाप्रधक्ष्यन्ति । इति यं कपि * रामम् ॥ १२ ॥ श्रुत्वासुग्रीवगिरं बलवन्तमुवाचगां हनूमन्तम् । तं सांजलिबन्धं यस्तमहं * रामम् ॥ १३ ॥ लङ्कापुरदुर्गाण्यपि बलपरिमाणंचगुप्तिकर्मचमे । ब्रूहीत्यूचेतं यस्तमहं सी * रामम् ॥१४॥ अथहनुमान्लङ्काया विस्तारं गुप्तिकर्म दुर्गाणि । यस्मिंश्चृण्वत्यभणत्तमहं*रामम्॥१५॥ शैलाग्रेभातिपुरी रचितासाविश्वकर्मणामनसा। इति दूतोयमभाणीत्तमहं सीताधवं भजेरामम् ॥१६॥ द्वारेद्वारेनियुतं विहितं प्रयुतश्चरक्षसांगुप्त्यै। इति दूतोयम*रामम्॥१७॥ उत्तरभाग-

द्वारे बलिनो रथिनो वसन्त्यसंख्याताः । इति दूतोयमभाणीत्तमहं सीतधवं भजे रामम् ॥१८॥ भग्नाःपरिघाश्चमया दग्धालंकानिषूदितं सैन्यम् । इति हनुमान्यमभाणीत्तमहंसीताधवं भजे रामम् ॥ १९ ॥ बलवान्रावणपुत्रो निहतोऽक्षोनाम सचिवसैन्ययुतः । इति हनुमान्यमभाणीत्तमहंसी * रामम् ॥ २० ॥ श्रुत्वेत्थं दूतगिरं सुग्रीवं प्रेक्ष्य वक्तुमारेभे । वचनं यश्शास्त्रज्ञस्तमहं सीता * रामम् ॥२१॥ अद्य मुहूर्तोविजयश्शस्तुं जेतुंप्रयत्यतां जयदः । इति सुहृदंयोऽभाणीत्तमहं सीताधवं भजे रामम् ॥ २२ ॥ उत्तरफल्गुन्यद्यश्वोहस्तर्क्षंनयोग्यमभिगन्तुम् । इतिसुहृदंयोऽभाणी * रामम् ॥ २३ ॥ धन्यानि निमित्तान्यपि जायन्ते मे जयप्रदानि सखे । इति सुहृदंयोऽभाणीत्त* रामम् ॥ २४ ॥ नीलःप्रयातुसैन्यैरग्रेमार्गप्रदर्शकोबलवान् । इति सुहृदं योऽभाणीत्तमहं * रामम् ॥ २५ ॥ गजगवयगवाक्षास्ते यांत्वग्रे मार्गशोधकास्सैन्यैः । इति सुहृदंयोऽभाणीत्तमहं * रामम् ॥ २६ ॥ अधिरुह्याहं मारुतिमङ्गदमनुजोप्युभौसमेष्यावः । इति सुहृदंयोऽभाणीत्तमहं * रामम् ॥ २७ ॥ अथयस्यागिरं श्रुत्वा वानरराजस्समादिदेश तदा । कपिसैन्यं सन्तुष्टस्तमहं * रामम् ॥ २८ ॥ अथ कपिवीरास्सह्यं गिरिवरमापुर्नगैर्वृतं सफलैः । यत्सुहृदाज्ञातुष्टास्तमहंसी * रामम् ॥ २९ ॥ कपिवीरावधिरूढौ दाशरथी तौ धनुर्धरौ बलिनौ । यस्यसुहृत्समपश्यत्तमहं सीताधवं भजे रामम् ॥३०॥ अथशुभशकुनं दृष्ट्वा सौमित्रिर्यं वचोऽब्रवीत्तुष्टः । पश्यनिमित्तं शुभमिति तमहं * रामम् ॥ ३१ ॥ सीतां मुमोक्षयिषवस्सर्वेयुद्धाभिकांक्षिणः कपयः । प्रययुर्यन्मित्रहितास्तमहं सी * रामम् ॥ ३२ ॥स्नात्वा नद्यां सलिलं पीत्वाभुक्त्वाफलानिरसवन्ति । यत्सुहृदंतेऽनुययुस्तमहं * रामम् ॥ ॥३३॥ पर्वतकान्तारनदी स्तीर्त्वा कपयोमहेन्द्रमाजग्मुः।जयकांक्षायत्सुहृदस्तमहं सी * रामम् ॥ ३४ ॥ अथतिमिनक्रझषाकुलमाब्धि-

ददृशुर्भयप्रदंकपयः । जयकांक्षा यत्सुहृदस्तमहंसीताधवं भजेरामम्॥
॥ ३५ ॥ अधिरुह्यमहेन्द्रंयोदृष्ट्वाजलधिं त्वपारमवरुह्य । अवदाद्वि-
रमथसुहृदंतमहं सीता * रामम् ॥ ३६ ॥ सुग्रीवप्राप्तावयमब्धेस्तीरं
प्लवङ्गसैन्ययुताः। इति गिरमभणत्तं यस्तमहं*रामम् ॥३७॥ प्राप्तोऽद्य-
मन्त्रसमयस्सा गरतरणेमहान्धियासाध्यः । इतिगिरमभणत्तं यस्तमहं
सीता* रामम्॥३८॥ अद्यास्यां वेलायामब्धेस्सर्वं निवेश्यतां सैन्यम् ।
इति गिरमभणत्तं यस्तमहं * रामम् ॥३९॥ सेनापालास्स्वांस्वां सेनां
परिपालयन्तुबद्धधियः । इति गिरमभणत्तं यस्तमहं * रामम् ॥४०॥
इति यद्वचनं श्रुत्वा नीलस्सेनापतिस्तदासर्वम् । सैन्यमरक्षत्स्वधिया
तमहं सीता * रामम् ॥ ४१ ॥ अथपार्श्वस्थं भ्रातरमूचेयोवाचमश्रु-
पूर्णाक्षः । सुमबाणाहतकायस्तमहं सीता * रामम् ॥ ४२ ॥ जित्वा
रावणमाजौ द्रक्ष्यामिकदा विदेहजां युवतीम् । इत्यनुजंयोवाऽदीत्त-
महं सीता * रामम् ॥ ४३ ॥ बिंबोष्ठं तद्वदनं पास्यामिकदाऽहमीष-
दुन्नम्य । इत्यनुजं योऽवादीत्तमहं सीता * रामम् ॥४४ ॥ सीता
वियोगजातं दुःखं त्यक्त्वासुखंकदैष्यामि । इत्यनुजंयोऽवादीत्तमहं *
रामम् ॥ ४५ ॥ एवं विलपन्नुच्चैरनुजेनाऽऽश्वासितश्चयो युक्त्या ।
सन्ध्यां समुपास्ततदातमहं सीता * रामम् ॥ ४६ ॥ लङ्कांदृष्ट्वादग्धां
निहतान्रक्षोगणांश्चसुतमक्षम् । यद्विड्व्यसनं प्रापत्तमहंसी * रामम्॥
॥ ४७ ॥ कपिनैकेनैवेदं सर्वं कृतमित्युपात्तबहुचिन्तः । यद्विड्
व्यसनं प्रापत्तमहंसीता * रामम् ॥ ४८ ॥ मन्त्रंजयस्यमूलं प्राहुः
प्राज्ञामनस्विनोपीति । यद्विड्व्यसनं प्रापत्तं सीता * रामम् ॥४९॥
संमन्त्र्यकार्यकारीसचिवैःप्रोक्तस्सपूरुषश्श्लाघ्यः। इतियद्द्वेष्याचिचिन्त-
त्तंसीताजानिमाश्रये रामम् ॥ ५० ॥ स्वयमेवकार्यकारीहठबुद्धिर्यस्स
मध्यमःप्रोक्तः । इतियद्द्वेष्यचिचिन्तत्तं सीताजानिमाश्रये रामम् ॥
॥ ५१ ॥ गुणदोषधर्मचिन्ता त्यागीकार्ये नरोऽधमो ज्ञेयः । इति

यद्वेष्यचिचिन्तत्तं सीता * रामम् ॥५२॥ प्राप्यधिषणैकमत्यं सचिव कृतंमन्त्रमुत्तमं प्राहुः । इति यद्वेष्यचिचिन्तत्तं सीताजानि माश्रये रामम् ॥५३॥ विविधमतयोपिसचिवा यत्रसमानास्समध्यमो मन्त्रः । इति यद्वेष्यचिचिन्तत्तं सीता * रामम् ॥ ५४ ॥ यत्र श्रेयो नभवति सचिवैक्येप्यधम एवमन्त्रस्सः । इतियद्वेष्यचिचिन्तत्तं सीता ॥५५॥ हेसचिवाः किं कार्यं रामोऽभ्येत्यद्यवानरैस्सहसा । इत्यूचेयद्विट्तां स्तं सीता * रामम् ॥ ५६ ॥ इत्थं यद्विड्वचनं श्रुत्वा प्रोचुर्वचः कृताञ्जलयः । सचिवा दशवदनंद्राक्तंसीता * रामम् ॥ ५७ ॥ अज्ञात्वास्वपरबलं राजानं भापयन्तिबलहीनाः । इतियद्विषमूचुस्ते तं सीताजानिमाश्रये रामम् ॥ ५८ ॥ विजितादेवास्सर्वे जित्वाज्येष्ठं विमानमानीतम् । इति यद्विषमूचुस्तेतंसीता * रामम् ॥ ५९ ॥ दत्तामयेन दुहिता भार्यार्थेतेमधुश्च विजितोऽभूत् । इति यद्विषमूचुस्ते तं सीता * रामम् ॥ ६० ॥ वासुकितक्षक शङ्खप्रमुखा नागाजिताश्च युधिभवता । इतियद्विषमूचुस्ते तंसीता * रामम् ॥ ६१ ॥ भवताऽभ्यस्तामायास्सर्वान्जित्वाऽथदानवान्समरे। इति यद्विषमूचुस्तेतंसी * रामम् ॥६२॥ ब्रह्मनियोगाद्भवतामुक्तःकारागृहात् त्रिलोकेशः । इति यद्विषमूचुस्तेतं * रामम् ॥ ६३ ॥ इन्द्रजिदेकस्समरे वानरसेनां हनिष्यति स्वबलात् । इतियद्विषमूचुस्तेतं * रामम् ॥६४॥ अथसेनापतिरूचे यद्विड्पुरतःकृताञ्जलिर्वचनम्। शूरःप्रहस्तनामातं सीता* रामम्॥ ॥ ६५ ॥ बलिनोवयं प्रमत्ताः कपिनादुष्टेन वञ्चिता रात्रौ । इति यद्विषमाहसगांतंसीता * रामम् ॥ ६६ ॥ भवदाज्ञां प्राप्याहं सर्वां पृथिवीमवानरां करवै । इतियद्विषमाहसगांतंसीता * रामम् ॥ ॥ ६७ ॥ अथदुर्मुखनामकः क्रुद्धःप्रोवाच वाचममरारिः । यद्विषमुद्वीक्ष्यतदा तंसीता * रामम् ॥ ६८ ॥ अद्यैकोहं सागरतीरं प्राप्तान्कपीन्हनिष्यामि । इति यद्विषमाहसगांतंसीता * रामम् ॥ ६९ ॥

अथवज्रदंष्ट्रनामा परिधं हस्तेवहन्गिरं प्रोचे । यद्वेषिणमति विनयात्तं सीताजानिमाश्रये रामम् ॥७०॥ रामंसुग्रीवयुतं सानुजकपिसङ्घमद्य-हन्म्येकः। इति यद्विषमाहसगांतंसीता* रामम् ॥७१॥ केचिन्मानुषवेषा गत्वारामं ब्रुवन्तुवचनमिदम् । इति यद्विषमाहसगांतंसीताजानि-माश्रये रामम् ॥ ७२ ॥ वयमद्यतवभ्रात्रा भरतेन प्रेषिता इति ब्रुव-ताम् । इति यद्विषमाहसगां तं * रामम् ॥ ७३ ॥ सेनासहितोभरत-स्त्वाद्युपयास्यत्यसाविति ब्रुवाताम् । इति यद्विषमाहसगांतं * रामम्॥ ॥ ७४ ॥ वयमथ चापगदासिप्रमुखैश्शस्त्रैर्हनाम शत्रुगणम् । इति यद्विषमाहसगांतंसीता * रामम् ॥ ७५ ॥ अथ कुंभकर्णपुत्रस्स्वबल-मवादीद्रघूत्तमंजेतुम् । यद्विट्पुरतोधीरस्तंसीता * रामम् ॥ ७६ ॥ इत्थं यद्विट्पुरतस्सचिवान्वदतस्समीक्ष्य सन्त्रस्तः । अवदद्विभीषणो गांतंसीता * रामम् ॥ ७७ ॥ नावज्ञाकर्तव्या शत्रुबलं किञ्चिदप्य-विज्ञाय । इति यद्विषमाहसगांतंसीता * रामम् ॥ ७८ ॥ दुर्वृत्ताः खरमुख्या रामेणहतास्स्वदेहरक्षायै । इति यद्विषमाहसगां * रामम्॥ ॥ ७९ ॥ कलहोमाभूद्भ्रातस्सीताभर्त्रातवाद्यशृणुममगाम् । इतियद्वि-षमाहसगांतंसीता * रामम् ॥ ८० ॥ यावल्लंकानहतातावत्त्वं राघ-वायदेहि सतीम् । इति यद्विषमाह * रामम् ॥ ८१ ॥ अनुजस्यापि वचोममपथ्यं शृणुराक्षसेन्द्रहेभ्रातः। इतियद्विषमाह * रामम् ॥८२॥ कोपं त्यजभजधर्मं जीवेमवयं सुखं सदारसुताः । इति यद्विषमाह * रामम् ॥ ८३ ॥ भ्रातः प्रसीदवचनं शृणुमेऽद्यत्वं प्रदेहितां तस्मै । इति यद्विषमाहसगां * रामम् ॥ ८४ ॥ इत्थं स्वानुजवचनं श्रुत्वा यद्विड्विसृज्यतान्सभ्यान् । स्वगृहं सायमविक्षत्तंसीता * रामम् ॥ ॥ ८५ ॥ धर्मात्र्थविदथकल्ये यद्विड्भ्राताप्रविश्यराजगृहम् । ज्येष्ठं नत्वाऽहगिरं तंसीता * रामम् ॥ ८६ ॥ पुर्यां सीताऽऽहरणप्रभृति शिवाः कूजितानि तन्वन्ति । इति यद्विषमाहसगां * रामम् ॥८७॥

गृध्राःपरिलीयन्ते पुर्यां सर्वत्र संघशः पश्य । इति यद्विपमाहसगांतं सीताजानिमाश्रये रामम् ॥ ८८ ॥ साध्वीवैदेहीसा रामायाद्यप्रदीय तां भवता । इति यद्विष * रामम् ॥ ८९ ॥ न्याय्यं सन्धार्यभवान् बुद्धौ क्रुरुताद्यशस्यमायुष्यम् । इतियद्विप * रामम् ॥९०॥ हितमथ-मृदुहेतुयुतं कालत्रययोग्ययुक्तमपिवचनम्। यद्विट्च्छ्रुत्वाऽहगिरंतंसी* रामम् ॥ ९१ ॥ नभयंपश्याम्यधुना जात्वपिसीतामहं नमुञ्चामि । इतियद्विट्प्राहगिरंतंसीता * रामम् ॥ ९२ ॥ अथ सहजमाप्तवादि-नमत्यजदुग्रोविभीषणं यद्विट् । वैदेहीकामार्तस्तंसीता * रामम् ॥ ॥ ९३ ॥ प्राप्यसभां सोप्यवदद्यद्विड्दूतान्कृतान्तदूतसमान् । आन यतराक्षसानितितंसीता * रामम् ॥ ९४ ॥ यद्विट्सचिवैस्साकंपौरा-स्सर्वेप्राविश्चराजसभाम् । स्वोचितपीठमवापुस्तं सीता * रामम् ॥ ॥९५॥ अथरथमास्थायशुभं यद्विट्सहजोप्यवाप्यराजसभाम् । अवि-शत्पीठं विनतस्तंसीता * रामम् ॥ ९६ ॥ परिषदमवलोक्य तदा प्रोचेवाचं प्रहस्तमथयद्विट् । गुप्त्यर्थं लङ्कायास्तंसीता * रामम् ॥ ॥ ९७ ॥ अनुजोऽपि कुंभकर्णष्षण्मासांत्स्वपिति निद्रयाव्याप्तः । इतियद्विडुवाचतदातंसीता * रामम् ॥९८॥ जनकसुता मम शय्यां नेच्छत्यारोढुमद्यशशिवदना । इति यद्विडुवाचतदातंसीता * रामम्॥ ॥ ९९ ॥ पञ्चशरोप्यभितशरं मामप्यद्यप्रबाधते धीरः । इति यद्विडु वाचगिरंतंसीता * रामम् ॥१००॥ ❀ संवत्सरकालंमांसाऽयाचत भर्तुराप्तिकामनया। इतियद्विडुवाचगिरं तं जितरक्षः पतिं भजे रामम् ॥ ॥ १०१ ॥ कार्यगतिर्दुर्ज्ञेयाब्रूतयथाबुद्धि सम्यगालोच्य । इति यद्वि-डुवाच * रामम् ॥१०२॥ भीतिर्ममनास्तिनरात्कर्तव्यं ब्रूतयूयमेको-क्त्या । इति यद्विडुवाचगिरं तंजितरक्षःपतिं भजे रामम् ॥ १०३ ॥ राघवविजयस्सीतासंगोप्युभयं कथंभवेद्ब्रूत । इतियद्विडुवाच* रामम्॥ ॥ १०४ ॥ इतियद्विट्परिदेवितमथघटकर्णो निशम्यगिरमूचे । क्रोध-

प्रस्फुरितोष्ठस्तंजितरक्षः पतिंभजे रामम् ॥१०५॥ न्यायेनराज्यभरणं कुर्वन्राजानखिद्यते पश्चात् । इति यद्विषमाहसगांतं * रामम् ॥१०६॥ आनीतां रामसतीं श्रुत्वाऽनर्थो विनिश्चितोऽस्तिमया । इतियद्विषमाह सगांतंजितरक्षः * रामम् ॥ १०७ ॥ दृष्टस्तदायदिस्यारामेणत्वंगता सुरेवभवेः । इति यद्विषमाह सगांतं जित * रामम् ॥ १०८ ॥ तव शत्रून्हत्वाहंत्वदभिप्रायं समीकरिष्यामि। इतियद्विषमाहसगां*रामम्॥ ॥ १०९ ॥ अथयद्वेषिणमूचे समहापार्श्वोवचस्तदनुकूलम् । श्रृणुराज न्ममगिरमितितंजित * रामम् ॥११०॥ कुक्कुटवृत्तेन बलात्सीतामा- क्रम्यभुङ्क्ष्वनाथत्वम् । इति यद्रिपुमाहसगां * रामम् ॥१११॥ संप्राप्तं मधुहस्तं सम्यगपीत्वात्यजेत्कण्डहधीमान् । इतियद्रिपुमाहसगां* रामम् ॥११२॥ प्राप्तांच्छत्रूनथतेबलिनो वयमेत्यसंहरिष्यामः । इति यद्रिपुमाहसगांतं * रामम् ॥११३॥ इत्थं सचिवस्योक्तिं श्रुत्वावाचं जगादयद्वेषी । समहापार्श्वंदीनस्तंजित * रामम् ॥११४॥ पूर्वंपरमेष्ठि- गृहं गच्छन्तीं पुञ्जिकस्थलामभजम् । इतितमवादीद्यद्विट्तं जित * रामम् ॥ ११५ ॥ अथतद्ज्ञात्वाब्रह्मा शापं प्रादाद्बलात्कृतौस्त्रीणां। इति तमवादीद्यद्विट्तं जित * रामम् ॥११६॥ स्वबलात्त्वमन्यवनितां भोक्ष्यसिचेत्ते शिरःपतेच्छतधा। इति शापमाहयद्विट्तंजित * रामम्॥ ॥११७॥ शापाद्भीतोऽहन्तां शयनंनाऽऽरोपयेबलादधुना । इति स चिवमाह यद्विट्तं * रामम् ॥११८॥ इति तद्गिरमथयद्विट्सहजश्श्रुत्वा जगाद हितवचनम् । ज्येष्ठं कामशरार्तं तं जितरक्षःपतिंभजे * रामम् ॥ ११९ ॥ मास्तुबलवद्विरोधस्त्यजसीताशां रमस्वकान्ताभिः। इति यद्विषमाहसगांतंजित * रामम्॥ १२०॥ राघवमुक्तान्बाणान्मा ऽद्राक्षीस्त्वंदिशाद्यतां भर्त्रे । इति यद्विष * रामम् ॥ १२१ ॥ घट कर्णेन्द्रजिदाद्यास्समरे रामं निरीक्षितुं नालम् । इति यद्विषमाह * रामम् ॥ १२२ ॥ इत्थं विभीषणोक्तिं श्रुत्वाऽवादीद्गिरंप्रहस्तोऽपि ।

यद्विट्सहजेश्रृण्वतितंजितरक्षःपतिं भजे रामम् ॥ १२३ ॥ रामाद्ध
विताभीति स्समरेऽस्माकं कथन्नुनृपपुत्रात्। इतियद्विडनुजमूचेतंजित
रक्षःपतिं भजे रामम् ॥ १२४ ॥ श्रुत्वाप्रहस्तवचनं यद्विट्सहजो-
जगादपुनरपिगाश्च । दशवदनस्यपुरस्तात्तंजित * रामम् ॥ १२५ ॥
शत्रून्भवतस्सचिवान्ज्ञात्वा सुहृदश्चकाम्यसौरमते । इत्याह यद्विडनु-
जस्तं * रामम् ॥ १२६ ॥ शौचंसत्यश्चदया युष्मासु कदाऽपिनेत्यहं
जाने । इत्याहयद्विडनुजस्तंजित * रामम् ॥ १२७ ॥ राजारक्ष्यस्स-
चिवैरितिशास्त्रं नोभवत्सुगणनीयम् । इत्याह यद्विडनुजस्तं*रामम् ॥
॥ १२८ ॥ इतियद्विट्सहजोक्तिं श्रुत्वाप्रोचे तदेन्द्रजिद्वचनम् । नि-
र्मर्याद:कोपात्तंजित * रामम् ॥ १२९ ॥ अस्मिन्वंशे कश्चन धर्मिष्ठ-
स्त्वत्समःपुरानाभूत् । इति यद्विड्जःप्रोचेतंजित * रामम् ॥ १३०॥
शौर्ये धैर्येसत्ये त्वत्सदृशोनास्तिमत्पितृभ्रातः। इति यद्विड्जःप्रोचेतं*
रामम् ॥ १३१ ॥ भीपयसित्वं कस्मादस्मान्देवासुरादिजयतृप्तान् ।
इति यद्विड्जःप्रोचेतं * रामम् ॥ १३२ ॥ अथगिरमिन्द्रजिदुक्तां
श्रुत्वाऽवादीन्महार्थमपिवचनम् । यद्विट्सहजोधोरस्तंजित * रामम् ॥
॥ १३३ ॥ मन्त्रेनास्तिमतिस्ते बालिशबुद्धेस्तथाऽपि बहुवदसि ।
इत्याहयद्विडनुजस्तं जितरक्षःपतिं भजे रामम् ॥ १३४ ॥ आत्म
विनाशायत्वं हीनं वचनं पितृव्यमालपसि । इत्याहयद्विडनुजस्तं *
रामम् ॥ १३५ ॥ मद्भ्रातुस्त्वं शत्रुःपुत्रमिषान्मूलहानि कृद्भवसि ।
इत्याह यद्विडनुज * रामम् ॥ १३६ ॥ यमदण्डसमान्बाणान्रामप्र-
हितान्सहेतयुधिकोवा । इत्याहयद्वि * रामम् ॥ १३७ ॥ सर्वस्वं
सीतामपि रामाय निवेदयाशुहेभ्रातः। इत्याहयद्वि * रामम् ॥१३८॥
इत्यनुजेब्रुवतिवचः कोपाद्यद्विड्जगादपरुषगिरम् । कालवशोऽवरजं
सं तंजितरक्षः * रामम् ॥ १३९ ॥ कुलपांसनमद्यत्वां भ्रातृधियाऽहं
नहन्मि पापिष्ठम् । इति तं यद्विडवादीत्तं * रामम् ॥ १४० ॥ ज्ञाति

15744

महम् । इत्याहकपीन्द्रंयस्तं भक्तेष्ट * रामम् ॥ १७६॥ सुग्रीवस्त्वथ-वचनं श्रुत्वायत्प्रोक्तमाशुधर्मज्ञः । विहितांजलिरवदद्वांतंभक्तेष्टप्रदं भजे रामम् ॥ १७७ ॥ साधुर्वाऽसाधुर्वा शरणागतरक्षकस्यतवरक्ष्यः। इतियंसुहृदभणद्वां तं भक्ते * रामम् ॥ १७८ ॥ वक्तव्यं सूक्ष्मतमं श्रुणुकपिनाथत्वमद्यवचनंमे । इति सुहृदमाहयोगां तंभक्ते * रामम्॥ ॥ १७९ ॥ नाहं तत्कुलजातो राज्यार्थीमामगादसौ शरणम् । इति सुहृदं योऽभाणीत्तंभक्ते * रामम् ॥ १८० ॥ ग्राह्यो विभीषणोयं शत्रोरनुजोऽपि शरणमापन्नः। इति सुहृदंयोऽभाणीत्तं भक्ते * रामम्॥ ॥१८१॥ अभयं ददामिसकृदप्यागतशरणार्थि सर्वलोकेभ्यः। इति सुहृदंयो * रामम् ॥ १८२ ॥ शरणं रामेति वदन्त्यजतुभयं कालमृ-त्युतोऽपिजनः । इति सुहृदं * रामम् ॥ १८३॥ श्रुत्वाऽथोयस्यगिरं ममचाप्यात्मैनमद्यवेत्यमलम् । इति कपिपतिराहागिरं तं भक्तेष्टप्रदं भजे रामम् ॥ १८४ ॥ तस्माद्विभिषणोयं मैत्रीमस्माभिरद्यचाऽऽप्नोतु। इति कपिपतिराहागिरन्तं* रामम् ॥१८५॥ अभयेदत्तेप्रभुणायेन चतु-र्भिर्विभीषणोमात्यैः । गगनाद्भूमिंप्रापत्तंसक्ते * रामम् ॥ १८६ ॥ शरणान्वेष्यथपदयोर्भक्त्यायस्यप्रणम्यागिरमूचे । बह्वर्थांधर्मयुतां तं भक्ते * रामम् ॥ १८७ ॥ अनुजोभवतश्शत्रोस्सर्वशरण्यं भवन्तमह-मागाम् । इति यमभाणीत्सागिरं तं भक्ते * रामम् ॥ १८८ ॥ अस हिष्णुस्त्वपमानं तेनकृतं भवन्तमहमापम् । इतियमभाणीत्सागिरंतं * रामम् ॥ १८९ ॥ इतिवादिनमथतंयोऽपृच्छद्रक्षो बलाबलं सर्वम् । आर्तपरित्राणेच्छुस्तं * रामम् ॥ १९० ॥ पूर्वं तपसातुष्टो ब्रह्माप्रादा-दवध्यतां तस्मै । इति भक्तोयमवादीत्तं भक्ते * रामम् ॥ १९१ ॥ त्यक्त्वामनुष्यगणनां सर्वेभ्योऽसाववध्यतां प्रापत् । इति भक्तो यम-वादीत्तं * रामम् ॥ १९२ ॥ इतिरावणबलमुक्त्वा सैन्येशबलंविव क्षुरारेभे । यत्पुरतो भक्ताग्र्यस्तं भक्ते * रामम् ॥ १९३ ॥ युधि

धिक्कृतशत्रुबलः कैलासेविजितमाणि भद्रस्सः । इत्याहसयत्पुरतस्तं भक्तेष्टप्रदं भजे रामम् ॥ १९४ ॥ बलवान्प्रहस्तनामारावणतोषप्रदस्सदातुष्टः । इत्याहसयत्पुरतस्तम्भक्ते * रामम् ॥ १९५ ॥ दशवदनावरजोमेज्येष्ठोऽस्तिचकुंभकर्ण इतिनाम्ना । इत्याह स यत्पुरतस्तंभ* रामम् ॥ १९६ ॥ युधिदिक्पतिजेतासौ धातुर्वरदाद्ग्रहीतबहुनिद्रः। इत्याहसवाचं यंतंभक्ते * रामम् ॥ १९७ ॥ त्वद्रिपुपुत्रः कश्चिन्नाम्नाकृत्येनचेन्द्राजिच्चेति । इत्याहसवाचं यं तंस्वीकृतभक्तमाश्रये रामम् ॥ १९८॥ अग्निंसन्तर्प्य समित्यन्तर्धिमवाप्यहन्त्यरीन्सोऽपि। इत्याहसवाचं यंतं*रामम् ॥१९९॥ सेनापतयो बहवस्सन्तिमहापार्श्व मुख्यमांसाशाः । इत्याहस * रामम् ॥ २०० ॥ इत्थं विभीषणोक्तां वाचं श्रुत्वापुनर्जगादगिरम् । विनतंभक्तं प्रतियस्तं स्वीकृतभक्तमाश्रये रामम् ॥ २०१ ॥ हन्यां विंशतिहस्तं शस्तं युधिसप्रहस्तमेकस्तम् । इतियस्तं गिरमभणत्तंस्वीकृत * रामम् ॥ २०२ ॥ दत्वातुभ्यं लङ्कां राजानं त्वामहं करिष्यामि । इतियस्तं गिर * रामम् ॥२०३॥ प्रविशेद्वापातालं विधिलोकंवानिहन्मितं शत्रुम् । इतियस्तं गिर * रामम् ॥२०४॥ नाहमहत्वायुधितं यास्यामिपुरीं शपामि सहजैस्वैः । इतियस्तं गिर * रामम् ॥२०५॥ श्रुत्वाऽथगिरं सुहृदो यस्यविनीतः प्रणम्यधर्मात्मा । वक्तुमुपचक्रमेगांतं स्वीकृतभक्ते *रामम् ॥२०६॥ राक्षसवधविषयेहं भवतस्साह्यं यथोचितं कुर्वे । इतियमभाणीद्भक्तस्तं स्वीकृत भक्तमाश्रये रामम् ॥ २०७ ॥ लङ्काप्रधर्षणेहं मतिसाहाय्यं करोमि रघुवीर । इति यमभा * रामम् ॥ २०८ ॥ इत्थं निगदन्तं यस्तोषादालिङ्ग्यतं ततोऽवरजम् । अभणच्छ्रितकल्पद्रुस्तंश्रितरक्षोनुजं भजे रामम् ॥ २०९ ॥ अभिषिञ्चाद्यविभीषणमनुजैनं राक्षसाधिपत्येत्वम् । इतियोऽनुजमभणद्गान्तं श्रित * रामम् ॥२१०॥ अथसौमित्रिस्तुष्टो वानरमध्येऽभ्यषिञ्चदेनंद्राक् । यस्सज्ञां शिरसिवहं

स्तंश्रितरक्षोनुजं भजे रामम् ॥ २११ ॥ अथसुग्रीवो हनुमान्यद्भक्तं
वाचमूचतुश्चतदा । अंबुधिसन्तरणात्र्थं तंश्रितरक्षोनुजं भजे रामम् ॥
॥२१२॥ अब्धेस्तरणोपायं वदतु भवानित्यपृच्छतांतौद्वौ । यद्भक्तं
धीमन्तं तंश्रितरक्षो * रामम् ॥ २१३ ॥ इतिताभ्यामथपृष्टो यद्भक्तो
वाचमाह सन्तुष्टः । अब्धेस्तरणात्र्थंद्राक्तंश्रित * रामम् ॥२१४॥
उदधिराजाऽस्माकं रामश्शरणं व्रजत्विदानींद्राक्। इतियद्भक्तोभाणीत्तं
श्रित * रामम् ॥ २१५ ॥ इत्थं विभीषणोक्तिं श्रुत्वोचेद्राक्सलक्ष्मणं
रामम् । यन्मित्रं सुग्रीवस्तं श्रित * रामम् ॥ २१६ ॥ अथ कपि
पति सौमित्र्योर्वाचादर्भास्तृते तटेजलधेः । यस्संविवेशनियमात्तंश्रि*
रामम् ॥ २१७ ॥ अथयन्निसृतध्वजिनीं दृष्ट्वालङ्कां प्रविश्यशार्दूलः ।
लङ्केशंप्राहगिरंतंश्रित * रामम् ॥ २१८ ॥ वानरपतिनागुप्तौ दश-
रथपुत्रौ समागतौभातः । इतियद्विषमाहचरस्तं श्रित * रामम् ॥
॥२१९ ॥ सान्त्वं वा भेदोवा शीतायादानमेव वा क्रियताम् । इति
यद्विषमाहचरस्तं श्रितरक्षोनुजं भजेरामम् ॥२२०॥ अथशार्दूलस्यगिरं
श्रुत्वाऽवादीच्छुकंचरं वचनम् । यद्द्वेषीदुष्टमतिस्तं* रामम् ॥ २२१ ॥
सुग्रीवं ब्रूहित्वं मद्वचसाशीघ्रमेत्यानिर्भीकः । इति तंयद्द्वेष्यवदत्तं श्रित
* रामम् ॥ २२२ ॥ इति सन्दिष्टश्चारो गत्वाऽवादीन्नभस्थितो
वाचम् । राज्ञोक्तां यत्सुहृदेतं श्रितरक्षो * रामम् ॥ २२३ ॥ राजकुले
जातस्त्वं भ्रातृसमोमे हरीशयाहिपुरम् । इति यत्सुहृदश्रणोद्गान्तम्
श्रितरक्षो रामम् ॥ २२४ ॥ किन्तवलाभो भ्रातर्भास्तु विरोधोमया
ह्यशृणुवचनम् । इति यत्सुहृदशृणो * रामम् ॥ २२५ ॥ गच्छत्वं
किष्किन्धां हरिभिस्साकंस्थिरोस्तुनौस्नेहः। इतियत्सुहृदशृणो*रामम्॥
॥ २२६ ॥ अथतंकपयस्तूर्णं चाप्लुत्यनभोनिपात्यभुविजघ्नुः। यद्विद्
ग्रहितं चारन्तं श्रित * रामम् ॥ २२७ ॥ अथसोऽकूजच्चारःकपयो-
मांघ्नन्ति रामपश्यत्वम् । इतियद्द्वेषिप्रहितस्तं श्रित* रामम् ॥२२८॥

शुकपरिदेवितमथयश्श्रुत्वाऽवादीत्कपींश्चधर्मज्ञः । चारवधपरिजिहीर्षु-
स्तं श्रितरक्षोनुजंभजे रामम् ॥ २२९ ॥ शास्त्रीयोदूतवधश्चारवधोवा-
भवेन्नशूराणाम् । इतियोऽमोचयदथतंतंश्रित * रामम् ॥ २३० ॥
अथभूत्वागगनस्थो यद्द्वेष्युक्तं वचोनिखिलमुक्त्वा । प्रतिगिरमयाच-
तशुकस्तं श्रित *रामम् ॥ २३१॥ अथयत्सुहृदाहशुकं ममसित्रं त्वं
नजातुरामद्विट् । इतिवदतंदशगलमितितं श्रित * रामम् ॥ २३२॥
त्वां सुतबन्धुसमेतं रामारातिं निहन्मियन्मित्रम् । इतिवदतमिततम्
चेतं श्रितरक्षो * रामम् ॥ २३३ ॥ शीघ्रंगत्वालङ्कां वद दशवदने
मदुक्तवचनंत्वम् । इति तं यत्सुहृदवदत्तंश्रित * रामम् ॥ २३४ ॥
नायंदूतोराजंश्चारिकोमे विभातिगणितबलः । इतियत्सुहृदशृणोद्गां
तं श्रित * रामम् ॥ २३५ ॥ अंगदगदितां वाचं श्रुत्वा कपयश्शुकं
तदाजगृहुः । पश्यति यत्सुहृदिद्राक्तं श्रित * रामम् ॥ २३६ ॥
अथसोऽक्रन्दद्रामप्राणान्मेरक्षभिद्यतेऽक्षियुगम्। इति शुकगिरमशृणो-
द्यस्तं श्रित * रामम् ॥ २३७ ॥ जह्यां चेत्प्राणानहमशुभं सर्वं मदी
यमुपभुङ्क्ष्व । इति यमवादीत्सशुकस्तं श्रित * रामम् ॥ २३८ ॥
श्रुत्वातत्परिदेवनमथदूतं योऽयमोचयद्धननात् । नामश्रुति तुष्टोद्राक्तं
श्रितरक्षो * रामम् ॥ २३९ ॥ अद्याब्धेस्तरणंवा मरणं वामेस्तुदर्भे
शयितस्य । इतियोव्रतनिष्ठोभूत्तं श्रित * रामम् ॥२४० ॥ दक्षिण-
मुपधायभुजं विधिवत्प्रयतोऽशयिष्टयोऽब्धितटे । तिस्रोरात्रीर्नियमात्तं
श्रित * रामम् ॥ २४१॥ अब्धेरप्रत्यक्षाद्व्रतनिष्ठो पिक्रुधासमीपस्थम् ।
अनुजंगिरमवदद्यस्तं श्रितरक्षो * रामम् ॥ २४२ ॥ क्षमयायुक्तम-
शक्तंमांमनुतेऽयं विलोकयाऽद्यत्वम् । इत्यनुजं योऽभाणीत्तं श्रित *
रामम् ॥ २४३ ॥ आनयचापं बाणानेनं जलधिं विशोषयिष्यामि ।
इत्यनुजं योऽभाणीत्तं * रामम् ॥ २४४॥ पद्भ्यां यान्तुप्लवगाजलधिं
पश्याद्यनिर्जलंकरवै । इत्यनुजंयोऽभाणीत्तं श्रित * रामम् ॥२४५॥

अथयःकरधृतचापोविशिखांस्तीक्ष्णान्युयोज कोदण्डे । दानवपन्नगभयदांस्तं श्रितरक्षोनुजं भजे रामम् ॥ २४६ ॥ अथसौमित्रिर्मा मेत्युक्त्वा वाचंधनुश्चयेन धृतम् । आलम्बतहस्ताभ्यान्तं श्रितरक्षो * रामम् ॥ २४७ ॥ अद्यमम कार्मुकस्थो विशिखस्त्वामद्यशोषणं कुरुते। इत्यभणद्योजलधिं तं श्रित * रामम् ॥ २४८ ॥ ममपौरुषमब्धेत्वं ब्राह्मेणास्त्रेणपश्यसन्तुष्टः । इत्यवदद्यो * रामम् ॥२४९॥ संयोजितविध्यस्त्रे चापेक्रुद्धेन येनजगदखिलम् । भीतंबभ्राम तदातांश्रित * रामम् ॥ २५० ॥ पश्चाच्चक्रामाब्धिर्वेलांत्यक्त्वा यदीयशरतप्तः । रूपं सदिदर्शयिषुस्तंश्रित * रामम् ॥ २५१ ॥ प्राञ्जलिरुदधिर्वाक्यं भीतोऽवादीद्यमीशसमशौर्यम् । शरपाणिमथोदृष्ट्वा तंश्रित * रामम् ॥ ॥२५२॥ सृष्टोभवतैवाहं पूर्वं जाड्याश्रयोभवेति सयमूचे। शरपाणिमथोदृष्ट्वातंश्रित*रामम्॥२५३॥ जलसन्तरणोपायंहर्यक्षाणांवदामिवाचाऽहम्। इतिजलधिर्यमवोचत्तंश्रि*रामम्॥२५४॥पितृदत्तवरोद्यनलस्सेतुं बध्नातुवृक्षदृषदाद्यैः । इति जलधिर्यमवोचत्तं * रामम् ॥ २५५ ॥ ❀ उक्त्वैवं जलधिरगादन्तर्धिमथोविर्तीर्य यस्मैद्राक् । शरलक्ष्यंमरुभूमिं तं जलधेर्भीतिदं भजेरामम् ॥ २५६ ॥ अथकपयस्सालादीन्वृक्षांश्शैलान्बलात्समाहार्षुः । यत्सुहृदाज्ञावशगास्तं जलधे * रामम् ॥ ॥ २५७ ॥ सूत्राण्यन्येजगृहुर्दण्डान्केचिद्वलीमुखाजगृहुः । यत्सुहृदाज्ञावशगास्तंजलधे * रामम् ॥ २५८ ॥ विहितानियोजनानि प्रथमेनाह्नाचतुर्दशांबुनिधौ । यस्मिन्पश्यति सेतुं तं जलधे * रामम् ॥ ॥ २५९ ॥ अथयोजनानि विंशतिरपरेणाह्नाकृतानि कपिवीरैः । यस्मिन्पश्यतिसेतुं तंजलधे * रामम् ॥ २६० ॥ अन्येनचैकविंशतिरह्नाविहितानियोजनानितदा । यस्मिन्पश्यति सेतुं तंजल*रामम् ॥ ॥ २६१ ॥ द्वाविंशतिश्चतुर्थे विहितानिच योजनानितैरह्नि । यस्मिन्पश्यतिसेतुं तंजल*रामम् ॥२६२॥ दिवसेपञ्चम आसन्योजनसंख्या

स्तदा त्रयोविंशत् । यस्मिन्पश्यति सेतुं तंजलधेर्भीतिदंभजे रामम् ॥
॥ २६३॥ इत्थं बबन्धसेतुं जलधौधीमान्नळश्चकपिसाह्यात् । यस्मिन्
पश्यति तोषात्तं * रामम् ॥ २६४ ॥ दशयोजनमायामेदैर्घ्येशतयो
जनं नळस्सेतुम् । यत्तृप्त्यैसोऽभान्सीत्तं जलधेर्भीति * रामम् ॥
॥ २६५ ॥ ददृशुस्सर्वे देवा भवबन्धहरं नळेनकृतबन्धम् । यस्या
ज्ञावशगेनच तं जल * रामम् ॥ २६६ ॥ तत्रगदापाणिद्राग्भक्तस्स-
चिवैश्चतुर्भिरनुयुक्तः । यंप्रणिपत्यासेवत तं जलधेर्भीतिदं भजेरामम्॥
॥ २६७ ॥ सुग्रीवस्त्वथवाचंप्रोचे मोचाफलादि सद्दशरसाम् । यस्य
समीपेविनतस्तं * रामम् ॥ २६८ ॥ आरोह हनूमन्तं त्वं सौमित्रि-
स्तथांगदंरुह्यात् । इति यंसुहृदभणद्गां तंजल * रामम् ॥२६९॥ अद्ययु
वां कपिवीरौ खपद्व्यातारयिष्यतस्सुखिनौ । इति यं सुहृदभणद्गां
तंजल*रामम् ॥२७०॥ उक्त्वेत्थं येनससंसावरजेन प्रयाणमकरोद्राक्।
कपिराजस्सैन्ययुतस्तं जल * रामम् ॥२७१॥ उडुपेनाब्धौ केचिन्मा-
र्गमलब्ध्वा विहायसाकेचित् । यत्पुरतोब्धिं तेरुस्तंजल * रामम् ॥
॥ २७२ ॥ तत्कर्मवीक्ष्यदेवैः किन्नरसिद्धादिभिस्तदामुदिताः । यम-
पूपुजन्तमुनयस्तं जल * रामम् ॥ २७३ ॥ शत्रूञ्जयभोराघव पालय
सर्वां स सागरामुर्वीम् । इति सर्वे यमशंसंस्तंजल * रामम् ॥२७४॥
अथसुग्रीव विभीषण सहितो लङ्कांप्रतिप्रतस्थेयः । दुष्टवध विहित-
धिषणस्तं * रामम् ॥ २७५ ॥ अथयोदृष्ट्वालङ्कां सीतांमनसा विचि
न्त्य विरहार्तः । अनुजमभाषतवचनं तंजलधे * रामम् ॥ २७६ ॥
परितस्थानेस्थाने सैन्यंकपयोविशन्तुयुधिनिपुणाः । इत्यवदद्योऽवरज-
न्तं* रामम् ॥ २७७ ॥ लङ्कां भिमर्दयिषवो गिरिशृङ्गादीन्प्रगृह्यचा-
सेदुः । यस्मिन्पश्यतिकपयस्तं जलधे * रामम् ॥ २७८ ॥ यस्याज्ञा-
प्रविमुक्तस्तोषाद्राजानमेत्य गिरसूचे । शृणुदशवदनेति शुकस्तंजलधे*
रामम् ॥ २७९ ॥ अब्धेरुत्तरतीरं गत्वाऽवोचंकपीश्वरंतवगाम्। इति

यद्विषमाहशुकस्तं जलधेर्भीतिदं भजे रामम् ॥२८०॥ श्रुत्वा तवगिर
मब्रवत्सोऽहं भ्रातानतेऽस्मिशत्रुरिति । इतियद्विषमाहशुकस्तं * रामम् ॥
॥ २८१ ॥ कपयोऽशक्याववक्तुं प्रतिवचनं वानलभ्यते तेषाम् । इति
यद्विषमाहशुकस्तं * रामम् ॥ २८२ ॥ आशुप्रयच्छसीतांयुद्धं वास्मै
प्रदीयतां भवता । इति यद्विषमाहशुकस्तं जल *रामम् ॥ २८३ ॥
इत्युक्तोयद्द्वेषी नाहं सीतां कदापिमुञ्चामि । इतिशुकमवदद्वचनं तं
जल * रामम् ॥ २८४ ॥ वीर्यं ममसमितिनरः पश्यतुरामोमदीयशर-
कृत्तः । इतियद्विड्गामवदत्तंजल * रामम् ॥ २८५ ॥ अथयद्विड्गिर-
मवदत्सचिवौशुकसारणौ तदावीक्ष्य । रिपुसैन्यपरीक्षायै तं जलधे *
रामम् ॥ २८६ ॥ गत्वाऽद्राक्तत्रयुवामापततं वीक्ष्यशत्रुसैन्यबलम् ।
इतितौ यद्विडवादीत्तंजलधे * रामम् ॥ २८७ ॥ आयातं झडिति
युवां दशरथसुतयोर्बलं परीक्ष्यधिया। इतितौ यद्विडवादीत्तं*रामम्॥
॥ २८८ ॥ इत्यादिष्टौतौद्राग्धरिरूपधरौप्रविश्यचैक्षेताम् । यं सानुज
सैन्ययुतं तंजल * रामम् ॥ २८९ ॥ अथभक्तो यमवादीत्प्रच्छन्नौ
तौ विभीषणोन्वीक्ष्य । क्रव्यादावेताविति तं जलधे * रामम् ॥२९०॥
अथदीनौतौदृष्ट्वा विगताशौ जीविते तदाऽभाणीत् । भयदोयःपापानां
तंजल * रामम् ॥ २९१ ॥ प्रहसन्गिरमूचेयः कार्यं राज्ञोयथोक्तमभ
वद्वा । इतितौ द्वेषिप्रहितौ तं जल * रामम् ॥ २९२ ॥ वधमर्हथो
नदूतौ सम्यग्दृष्ट्वाबलंचमांच युवाम् । गच्छतमितियोऽभाणीत्तं जल*
रामम् ॥ २९३ ॥ लङ्कांप्रविश्यनगरीं वक्तव्योमद्गिरासदशवदनः ।
इति यस्तौगिरमूचे तं जल * रामम् ॥२९४॥ श्वस्त्वं लङ्कान्द्रक्ष्यासि
विंशत्यादृष्टिभिश्चविध्वस्ताम् । इति वक्तुमाहतौ यस्तंजल * रामम्॥
॥२९५॥ प्रतिनन्द्येतौतं द्राक्प्रतिगम्यपुरीं वचस्तदाऽब्रूताम् । येनो-
क्तमिदं राज्ञे तं जल * रामम् ॥ २९६ ॥ तवसहजगिराज्ञात्वा येनो
न्मुक्तौ समागतावावाम् । इतिगिरमब्रूतान्तौ तं जल*रामम् ॥२९७॥

तरतस्तस्यबलस्योत्तीर्णस्यान्तो न विद्यते ज्ञातुम् । इति यद्विषमब्रूताम् तं जलधेर्मीतिदं भजे रामम् ॥२९८॥ वैरुध्येनालन्ते रामायाद्यप्रदीय तां सीता । इति यच्छलुमवक्तां तं जलधे * रामम् ॥ २९९ ॥ श्रुत्वा तद्वचनमथोसारणमूचेगिरञ्चयद्वेषी । नाहमदां सीतामितितं जल * रामम् ॥ ३०० ॥ इत्युक्त्वातं यद्विट्प्रासादं सोऽधिरुह्यकपिसैन्यम् । लङ्कामभितोऽपश्यत्तं जल * रामम् ॥ ३०१ ॥ तदपारमसंख्येयं वानरसैन्यं विलोक्य यद्वेषी । सारणमित्थमपृच्छत्तं महं मुक्त्यै सदाभजे रामम् ॥ ३०२ ॥ आचक्ष्वसारणत्वं सेनामध्ये प्रधानकपिवीरान् । इति तं यद्विडपृच्छत्तमहं मुक्त्यैसदाभजेरामम् ॥ ॥ ३०३ ॥ श्रुत्वायद्वेपिगिरं वाचं प्रोचेऽथसारणोभूपम् । निर्दिश्य चकपि सैन्यं तमहं मुक्त्यै * रामम् ॥ ३०४ ॥ संख्यातुमशक्यास्ते बहूलत्वाद्वच्मिकिञ्चिदवमृश्य । इत्याह स यद्धृध्यं तमहंमु * रामम् ॥ ॥ ३०५ ॥ घोषेणयोद्यमहतागर्जल्लँङ्कामुपैतिनीलस्सः । इत्याहसयद्ध ध्यं तमहं * रामम् ॥ ३०६ ॥ वालिसुतोंगदनामात्वां युद्धार्थं स माह्वयतिधैर्यात् । इत्याहसयद्धध्यं * रामम् ॥ ३०७ ॥ अब्धौसेतुर्बद्धो येनसधीरो नलोऽद्यपश्यतिनौ । इत्याहसयद्धध्यं तमहं मुक्त्यै सदाभजे रामम् ॥ ३०८ ॥ प्रत्येककपयोऽमीलंकां सर्वां विनाशयितुमीशाः । इत्याहसयद्धध्यं * रामम् ॥ ३०९ ॥ इत्थं सारणवचनं शृण्वन्तं यद्विषं समालोक्य । शुकनामागिरमवदत्तं * रामम् ॥ ॥ ३१० ॥ मैन्दद्विविदौकपिपति सचिवौ लङ्कां विमर्दितुं शक्तौ । इत्याहसयद्धध्यं तमहं * रामम् ॥ ३११ ॥ यद्धार्थेयंसीता तं पश्यत्वंगृहीतकोदण्डम् । इत्याहसयद्धध्यं * रामम् ॥ ३१२ ॥ यत्सविधेधृतचापस्तिष्ठति वीरस्सलक्ष्मणोबलवान् । इत्याहस * रामम् ॥ ॥ ३१३ ॥ तत्सव्यपार्श्ववर्ती तवसहजोऽयं कृताभिषेकोभूत् । इत्याहसयद्धध्यं * रामम् ॥ ३१४॥ भूत्वाऽयं तद्दशगस्सर्वानसान्निहन्तुम-

मिलषति । इत्याहसयद्वध्यं तमहं मुक्त्यैसदाभजे रामम् ॥ ३१५ ॥ पश्यकपि सङ्घमध्ये काञ्चनमालागळश्च सुग्रीवम् । इत्याह* रामम् ॥ ॥ ३१६ ॥ एषकपीशोयोद्धुं राक्षसराजत्वयाभिलषतीश । इत्याह * रामम् ॥ ३१७ ॥ विजयेयत्नः कार्योभवताभूपाशुरामलक्ष्मणयोः । इत्याह * रामम् ॥ ३१८॥ श्रुत्वातयोश्चवचनं यद्विट्सहजं चसानुजं रामम् । कपिवीरांश्चापश्यत्तमहं * रामम् ॥ ३१९॥ इत्थं श्रुतवैरिबलोजातक्रोधस्तदाचयद्वेषी । निर्भर्त्स्याँवादीत्तौ तमहं * रामम् ॥ ॥ ३२० ॥ गच्छतमस्सादेशात्ज्ञात्वोपकृतिं सुग्रांनहन्म्यधुना । इति यद्विट्तावबदत्तमहं * रामम् ॥ ३२१ ॥ प्रतिनन्द्यतयोर्गतयोरवदद्वा चंमहोदरं यद्विट् । आनयचारान्द्रागितितमहं * रामम् ॥ ३२२ ॥ आहूताश्चारास्ते यद्विट्प्रहिताः प्रदक्षिणं कृत्वा । ग्रच्छन्नास्ते प्रययुस्तमहं * रामम् ॥३२३॥ ददृशूरामं सानुजमथ सुग्रीवं विभीषणश्च कपीन् । यद्विट्प्रहिताश्चारास्तमहं मुक्त्यै सदाभजेरामम् ॥ ३२४ ॥ अथशार्दूलेनयुतां श्चारान्यद्भक्तवाक्यतोऽगृह्णन्। कपयःपरितस्स्थित्वा तमहं * रामम् ॥ ३२५ ॥ अथकपिपीडितकायाश्चारायेन प्रमोचिता लङ्काम् । प्राप्योचुर्दशवदनं तमहं * रामम् ॥ ३२६ ॥ राजन्नक्षोभ्यबलैः कपिभिर्गुप्तोविभाति रघुवीरः । इति यद्विषमूचुस्ते तमहं * रामम् ॥ ३२७ ॥ श्रुत्वाचारगिरं तां जातोद्वेगो बभाणशार्दूलम् । शुष्कमुखं यद्वेषी तमहं * रामम् ॥ ३२८ ॥ शत्रोर्वशगमहंत्वां मन्ये शुष्कोष्ठमद्यशार्दूल । इति तं यद्विडपृच्छत्तमहं * रामम् ॥ ३२९ ॥ इति पृष्टश्शार्दूलो यद्विषमूचे गिरंतदाभीतः । वानरविहितां हिंसां तमहं * रामम् ॥ ३३० ॥ भाषितुमपितेकपयो नोशक्यास्तत्रकीदृशः प्रश्नः । इत्याहसयच्छत्रुं तमहं * रामम् ॥ ३३१ ॥ करजानुमुष्टिदन्ताघातैस्सन्ताडितोऽस्मिकपिभिस्तैः। इति यद्विषमाहसगांतं* रामम्॥ ॥ ३३२ ॥ अथनीतोऽहंकपिभीराघवसविधंचरक्त दिग्धाङ्गः । इति

यद्विषमाहसगांतमहं मुक्त्यै सदाभजे रामम्॥३३३॥ मामथविसर्जयि
त्वा लङ्काद्वारं समाश्रितस्सोऽद्य। इति यद्विषमाहसगांतमहं मुक्त्यैसदा
भजे रामम् ॥३३४॥ गरुडव्यूहेतिष्ठन्नाभः कपिभिर्वृतस्समेतिपुरीम्।
इति यद्विष* रामम् ॥ ३३५ ॥ सीतांवादेह्यस्मै युद्धं वादीयतां प्रभोह्य
धुना । इति यद्विष * रामम् ॥ ३३६ ॥इत्थं शार्दूलगिरं श्रुत्वाप्रति
वाक्यमाहयद्वेषी । नाहंदास्यंतामिति तमहंमु * रामम् ॥ ३३७ ॥
अथचाराणां वचसा ज्ञात्वा रामं सुवेलमधिरूढम् । यद्विट्सचिवान
वदत्तमहं * रामम् ॥ ३३८ ॥ प्राप्तोहिमन्त्रकालस्सम्यग्भूताद्यानिश्चयं
कृत्वा । इतियद्विट्तानवदत्तमहं * रामम् ॥ ३३९ ॥ अथमन्त्रिभि
रुक्तमसौ कार्यं कर्तुं समाह्वयद्याद्विट्। विद्युज्जिह्वं तद्ज्ञंतमहं मुक्त्यै-
सदा भजे रामम् ॥ ३४० ॥ अथतेनसमंयद्विट्तदशोकवनं तदामुदा
ऽविक्षत् । वैदेहीदुःखकरस्तमहं * रामम् ॥३४१ ॥ उपसृत्यततस्सी
तां वाचं प्रोचेतदाऽतिनीचस्सः । यद्वेषीदुःखकरस्तमहं * रामम् ॥
॥ ३४२ ॥ खरहन्तातवभर्तानिहतस्सुप्तो निशिप्रहस्तेन । इतियद्विट्
तामवदत्तमहं * रामम् ॥ ३४३ ॥ निगृहीतोमदवरजस्तदवरजोद्रा-
कपलायितः कपिभिः । इति यद्विट्ताम* रामम् ॥३४४ ॥ भग्नग्रीवो
जातस्सुग्रीवो जांबवान्मृतिंभेजे । इति यद्विट्ताम* रामम् ॥३४५॥
मैन्दद्विविदाद्यास्ते कपयः प्रापुःपरेतराड्गृहम् । इतियद्विट्ताम*रामम्॥
॥ ३४६ ॥ छिन्नहनुर्हनुमान्युधि संयमिनीदर्शनार्त्थमेवागात् । इति
यद्विट्ताम * रामम् ॥ ३४७ ॥ पति तांगदोऽथभूम्यां पतितोऽभूदं
गदोऽपि वालिसुतः । इति यद्विट्ता * रामम् ॥ ३४८ ॥ क्षतजार्द्रं
रामशिरोऽप्याहतमद्याऽस्तिपश्य नयनाभ्याम्। इतियद्विट्ताम*रामम्॥
॥३४९॥ विद्युज्जिह्वोऽपितदाधनुपासाकं शिरोनिनायद्राक् । यद्विट्स
ॐ विधं मायीतमहं सीतास्मृतं भजेरामम् ॥ ३५० ॥ सीतेनै
राश्यं भजरामे वशगाभवत्वमद्यमम । इति यद्विट्तामवदत्तमहं

यद्विषमाहसगान्तमहं सीतास्मृतं भजे रामम् ॥३८७॥ दाशरथिर्नो यक्षो देवोवाकिन्तुमानुपस्सबलः । इति यद्विषमाहस*रामम्॥३८८॥ सुग्रीवाद्याजात्याकपयोप्यरयोभवान्तिरामवशाः । इति यद्विष*रामम्॥ ॥ ३८९ ॥ घोरोत्पाता विविधा राक्षसनाशं ब्रुवन्तिपश्चत्वम् । इति यद्विष * रामम् ॥ ३९० ॥ नहि मानुषमात्रोसौ रक्षोमृत्युर्भवेदयं विष्णुः । इति यद्विष * रामम् ॥ ३९१॥ इति तस्यागिरं श्रुत्वाकुपि तस्सगिरंबभाण यद्वेषी । मातुःपैतामहमपि तमहं * रामम् ॥३९२॥ आनीयवनात्सीतां भीतस्तस्मात्कथंनुदास्यामि । इति तं यद्विडवादी-त्तमहं * रामम् ॥ ३९३ ॥ उदधौचसेतुबन्धे विहितेतव विस्मयः कथं जातः । इति तं यद्विडवादीत्तमहं * रामम् ॥ ३९४ ॥ श्रुत्वा यद्विड्वचनंलज्जाविष्टोजयाशिषं प्रोक्त्वा । प्रापद्वृद्धस्स्वगृहं*रामम्॥ ॥ ३९५ ॥ अथलङ्कायां यद्विड्गुप्त्यर्थंव्यादिदेशपूर्वस्याम् । बलिनं दिशिप्रहस्तं तमहंसी * रामम् ॥ ३९६ ॥ यद्विडथदक्षिणस्यां दिशि-गुप्त्यर्थंमहोदरं प्रोचे । समहापार्श्वं बलिनं तमहं * रामम्॥३९७॥ पश्चिमादिशिरक्षार्थंव्यादिशादिन्द्रारिमौरसं पुत्रम् । यद्विण्मायेशंद्राक्तमहं *रामम् ॥ ३९८ ॥ अहमुत्तरदिग्द्वारे सायुधपाणिर्भवामिरक्षार्थम् । इति यद्विड्गिरमवदत्तमहं*रामम् ॥३९९॥ कृत्वाविधिमित्थंद्राक् कृत कृत्यं कालचोदितोमत्वा । अविशत्स्वगृहं यद्विट्तमहं * रामम् ॥ ॥ ४०० ॥ अथनरवानरराजौ हनुमत्प्रभृतीन्कपींश्चसंप्रेक्ष्य । यद्भक्तो गिरमणत्तमहं सीता*रामम् ॥४०१॥ लङ्कावृत्तं निखिलं मत्सचिवो-क्तं शृणोतु सपदिभवान् । इति यमभाणीद्भक्तस्तं कृतयुद्धस्पृहं भजे रामम् ॥ ४०२ ॥ अथसचिवाःप्रोचुस्ते पृच्छन्तं यं प्रणम्यसा-ञ्जलयः । लङ्कावृत्तं निखिलं तं कृतयुद्धस्पृहं भजे रामम् ॥ ४०३ ॥ द्वारेषुपश्चिमादिषु पुत्राद्यानाहरावणोगुप्त्यै । इतिबभणुर्यं सचिवास्तं-कृत * रामम् ॥ ४०४ ॥ कौबेर्यांदिशिगुप्त्यै गच्छाम्यहमित्युदीर-

यच्छत्रुः । इति बभणुर्यंसचिवास्तंकृतयुद्धस्पृहंभञ्जे रामम् ॥४०५॥ अथभक्तामात्योक्तां वाचं श्रुत्वातदावचःप्रोचे । भक्तंतंयस्स्वधिया तं कृतयुद्धस्पृहंभञ्जे रामम् ॥४०६॥ पूर्वद्वारेनीलः प्रतियोद्धास्याद्बलैः प्रहस्तस्य । इति भक्तंयोऽभाणीत्तं कृत * रामम् ॥ ४०७॥ वालिसुतःप्रतियोद्धादक्षिणतस्स्यान्महोदराद्यस्य । इति भक्तंयोऽभाणीत्तं* रामम् ॥ ४०८ ॥ हनुमान्प्रतियोद्धास्यादिन्द्रजितस्तस्यपश्चिमद्वारे । इति भक्तंयो * रामम् ॥ ४०९ ॥ कौबेरककुब्द्वारंसावरजोहं द्रुतंप्रवेक्ष्यामि । इति भक्तंयो*रामम् ॥ ४१० ॥ त्वं भवमध्यमगुल्मे कपिरूपा एव सन्तुकपयोमी । इति भक्तंयोभाणीत्तं * रामम् ॥ ४११ ॥ त्वंसचिवाश्चत्वारस्सावरजोहञ्च सप्तनररूपाः। स्यामेत्यूचेतं यस्तंकृत * रामम् ॥ ४१२ ॥ इति संज्ञां कृत्वायस्सपदिसुवेलाधिरोहणोद्युक्तः । अवदत्कीशपलाशौतं * रामम् ॥ ४१३ ॥ अत्रनिशांवत्स्यामो लङ्कां कल्येवयञ्च पश्यामः । इतितौ गिरमवदद्यस्तं कृत * रामम् ॥४१४॥ ❀ एकोदशवदनोयं पापंकृत्वाकुलञ्चनाशयति । इतितौगिरमवदद्यस्तं कृतयुद्धस्पृहं * रामम् ॥ ४१५॥ आरुह्याथसुवेलं शिखरेयद्वेपि पालितांलंकाम् । ददृशुर्दीप्तांकपयस्तं कुत * रामम् ॥ ४१६ ॥ हर्म्यप्रकारयुतां यद्विद्पिरिपालितां पुरींदृष्ट्वा । कपयोऽकुर्वत शब्दांस्तंकृत * रामम् ॥ ४१७ ॥ केचिल्लँकाजग्मुर्यत्सुहृदाज्ञावशंवदाःकपयः । नादैः प्रकंपयन्तस्तंकृत * रामम् ॥ ४१८ ॥ गत्वाऽथसुवेलाग्रेयोजनयुग्मं सुहृत्समेतोयः । तत्रमुहूर्तमतिष्ठत्तं कृत * रामम् ॥ ४१९ ॥ लङ्कागोपुरशिखरे तिष्ठन्तंरत्ननिर्मितेपीठे । यद्विषमैक्षतकपिराट्तं कृत* रामम् ॥ ४२० ॥ यत्सुहृदुत्प्लुत्यतदा गोपुरशृङ्गंसमास्थितश्शत्रुम् । निर्भीकोगिरमवदत्तंकृत * रामम् ॥ ४२१ ॥ रामस्यसखादासोऽस्म्यहमद्यत्वां नजातुमुञ्चामि । इतियत्सुहृदवदत्तं * रामम् ॥ ४२२ ॥ इत्युक्त्वायन्मित्रं तच्छीर्षस्थं विचित्रमणि मकुटम् । भूम्यामपातय-

द्राक्तंकृतयुद्धस्पृहं भजे रामम् ॥ ४२३ ॥ सुग्रीवाद्यैवत्वं हीनग्रीवो-
भविष्यसीत्युक्त्वा । यद्देष्याक्षिपदथतं तंकृत * रामम् ॥ ४२४ ॥
अथयन्मित्रं शत्रुः कन्दुकवत्तं समाक्षिपद्भूमौ । आकृष्यस्वभुजाभ्यां
तंकृत * रामम् ॥ ४२५ ॥ यन्मित्रराक्षसेन्द्रौबलिनौयुद्धं प्रचक्रतुश्शू
रौ । उत्क्षिप्याक्षिप्यमिथस्तंकृत * रामम् ॥ ४२६ ॥ मायाविनमथ
दृष्ट्वा सुग्रीवस्तं तदोत्थितोनभसि । आगाद्यस्यसमीपं तंकृत*रामम्॥
॥ ४२७ ॥ दृष्ट्वावानरराजंसङ्ग्रामोद्भूतचिह्नसहितङ्ग्राम् । योगिर-
मालिङ्ग्यो चेतंकृत * रामम् ॥ ४२८ ॥ साहसमिदमद्यकृतंनोयुक्तं ते
सखे कपीशस्य । इतितं गिरमवदद्यस्तंकृत * रामम् ॥ ४२९ ॥
तवदर्शनमद्यनचेद्वैदेह्यावाऽनुजेन किङ्कार्यम् । इतितं गिरमवदद्यस्तं
कृतमुद्*रामम् ॥४३०॥ दृष्ट्वातवशत्रुमहं सोढुंशक्तः कथंभविष्यामि।
इतियंसुहृदभणद्रांतं * रामम् ॥ ४३१ ॥ अथतद्गिरमभिनन्द्यप्रोचे
वाचं तदाऽनुजंयोद्राक् । व्यूह्यबलंतिष्ठेतिचतंकृत * रामम् ॥ ४३२ ॥
घोराणिनिमित्तान्यपि सन्दृश्यन्तेबहूनिपश्यत्वम् । इतियोलक्ष्मणमव-
दत्तंकृत*रामम् ॥ ४३३ ॥ लङ्कामभियामवयं हरिभिश्शूरैस्सहांज
सेत्युक्त्वा । प्रययौयःकालज्ञस्तंकृत * रामम् ॥ ४३४॥ प्रस्थितमथयं
दृष्ट्वाजांबवदाद्यास्तदान्वयुश्चर्क्षाः । शत्रुजयोद्युक्ताद्राक्तंकृत * रामम् ॥
॥ ४३५ ॥ अङ्गदहनुमत्प्रमुख्याः कपयस्सर्वेसमन्वयूरामम् । यत्सु-
हृदासाकंद्राक्तंकृत * रामम् ॥४३६॥ अथधन्व्यनुजयुतोयो लङ्काद्वारं
रुरोधधनदादिशि । दशवदनं प्रतियोद्धुं तंकृत * रामम् ॥ ४३७ ॥
पूर्वद्वारंनलोदाक्षिणादिग्द्वारमंगदोप्यरुधत् । यद्द्विट्सचिवैर्योद्धुं तंकृत*
रामम् ॥ ४३८ ॥ पश्चिमदिशिहनुमानपिशक्रारिंजेतुमाहवेसज्जः ।
अभवद्यस्यागिराद्राक्तंकृत * रामम् ॥ ४३९ ॥ प्रघसप्रमाथिमुख्यैः
कपिभिर्युक्तःकपीश्वरोप्यास्थात् । यद्वचसागुल्मार्थेतंकृत * रामम् ॥
॥ ४४० ॥ षट्त्रिंशत्कोटिमिताःकपयोऽवात्सुः कपीश्वरं परितः ।

यद्वचसागुल्मार्धेतंकृतयुद्धस्पृहं भजेरामम् ॥ ४४१ ॥ द्वारेद्वारेकोटिं
कपिवीराणां न्यवेशयत्क्रमशः । यद्वचनात्सौमित्रिस्तंकृतयुद्धस्पृहंभजे
रामम् ॥ ४४२ ॥ कपिराक्षसराजाद्यैर्मन्त्रिप्रवरैस्तदातुसंमत्य । वा-
लिसुतं यःप्रोचेतं कृत * रामम् ॥ ४४३ ॥ अङ्गदनिर्भिकस्त्वंगत्वा
लङ्कांवदाऽऽशुदशकण्ठम् । मद्गिरमितियोऽवादीत्तंकृत * रामम् ॥
॥ ४४४ ॥ पापिन्धातृवरात्तो दर्पोऽद्यगतस्तवेति वदशत्रुम् । इति
तंगिरमवदद्यस्तं कृत * रामम् ॥ ४४५ ॥ येनबलेनचसीतामहरस्त्वं
तत्प्रदर्शयेतिवद । इतितं गिरमवदद्यस्तंकृत * रामम् ॥ ४४६ ॥
सीतामादायत्वं शरणंरामं भजेतिवदशत्रुम् । इतितं गिर * रामम् ॥
॥ ४४७ ॥ नोचेल्लोकमराक्षसमद्यकरोमीतिमद्गिरंब्रूतात् । इति तं
गिर * रामम् ॥ ४४८ ॥ धर्मात्मात्वदवरजो रक्षोराज्यंभरिष्यतीति
वद । इति तं गिर * रामम् ॥ ४४९ ॥ मद्विशिखैःपापीत्वं निहतः
पूतोभविष्यसीतिवद । इति तं गिरभणद्यस्तं वालिजदूतमाश्रये
रामम् ॥ ४५० ॥ कुरुसन्दृष्टां लङ्कांप्राणास्तेमद्वशास्त्विवतिब्रूतात् ।
इतिदूतमभाणीद्यस्तं * रामम् ॥ ४५१॥ इत्युक्तोवालिसुतःखपदव्या
ऽगाद्दशास्यानिलयं द्राक् । वक्तुंयस्यगिरन्तां तं वालि * रामम् ॥
॥ ४५२ ॥ सचिवैस्सहतिष्टन्तं दशकण्टं वीक्ष्यसोंगदःप्राचे । येनोक्तं
वचनं द्राक्तंवालिज * रामम् ॥४५३॥ अङ्गदवचनादज्ञात्वायेनोक्तां
रावणो गिरंक्रुद्धः । सचिवानवदद्वाचंतं वालि * *रामम् ॥४५४॥
दुर्बुद्धिर्दूतोयं पुरतोमेहन्यतां च युष्माभिः । इति यद्विडवादीत्तांस्तं *
रामम् ॥ ४५५ ॥ अथजगृहुश्चत्वारो राक्षसवीरास्तदांगदंक्रूराः ।
यद्विट्पुरतोवेगात्तंवालिज * रामम् ॥ ४५६॥ यद्दूतस्तान्कक्षेसंगृह्याका
शमाशुचोत्प्लत्य । द्राक्सोपातयदवनौतं वालिज * रामम् ॥४५७॥
अथ यद्दूतःपद्भ्यां सौधंभङ्क्त्वास्वनामविश्राव्य । कीशां स्तुष्टांश्चक्रे
तं वालिज * रामम् ॥४५८॥ यद्विट्सौधं ध्वस्तंदृष्ट्वा ज्ञात्वाऽऽत्मनो

विनाशंद्राक् । निश्वासंवद्धकरोत्तं वालिजदूत माश्रये रामम् ॥४५९॥ अथयोरिपुवधकांक्षीयुद्धायैवाभ्यवर्ततद्वारि। श्रितजनरोगार्तिहरन्तंवालि जदूतमाश्रये रामम् ॥ ४६० ॥ राक्षसवचनादज्ञात्वा रुद्धांनगरीं क्रुधाचयद्वेषी । आरुक्षत्प्राकारं तं वालिज * रामम् ॥ ४६१ ॥ सम वाप्यचिरं चिन्तां यद्वेष्यथधीरतां सभालम्ब्य । राममपश्यन्नेतस्तं * रामम् ॥ ४६२ ॥ द्वारेषु चतुर्ष्वर्पितत्सैन्यं सैत्याधिपेनसाह्यार्थम् । यस्यागिरासमातिष्ठत्तं वालिज * रामम् ॥ ४६३ ॥ अथकोपपरीतात्मा यद्वेष्याज्ञापयत्तदातेषाम् । सैन्यानां निर्याणं तं वालि * रामम् ॥ ॥ ४६४ ॥ अथनिर्गम्यगृहात्स्वात्प्रापुर्याद्विट्कुताज्ञयाऽसृक्पाः। कपि वीरैस्सहयोद्धुंतं वालि * रामम् ॥४६५॥ कपिवीरान्जघ्नुस्तेतानपिजघ्नु र्द्रुमायुधाः कपयः। यस्मिन्युद्धोद्युक्तेतं वालि*रामम् ॥४६६॥ अथतूमुलं युद्धमभूत्कपिराक्षससैन्ययोस्तदाभीमम् । यद्यद्विड्विजयेच्छोस्तं*रामम्॥ ॥ ४६७ ॥ शक्रजिताविद्धो यद्भृत्यायुवराट्स सारथिं साश्वम्। तस्य रथं युध्यवधीत्तं वालि * रामम् ॥ ४६८ ॥ अथजम्बुमालिविद्ध- श्शक्त्याहृदये तदाचयद्दूतः । हनुमानवधीद्युधितंतं वालि * रामम् ॥ ॥४६९॥अथयन्मित्रं कपिराट्प्रघसंयुद्धेजघानवृक्षेण । भक्ताधिव्याधि हरं तं वालि * रामम् ॥ ४७० ॥ सुप्तघ्नयज्ञकेतु प्रभृतीन्विशिखैर्निशा चरानवधीत् । यस्तच्छरकृत्ततनुस्तंवालि * रामम् ॥ ४७१ ॥ अथ तैःकपिभिश्शूरै राक्षसवीरास्तदाहतायुद्धे । यस्मिन्पश्यतिपुरतस्तं वा* रामम् ॥ ४७२ ॥ अथरात्रावपियुद्धंकपिराक्षससैन्ययोस्तदासमभूत् । यस्मिन्पश्यतिपुरतस्तं वालि * रामम् ॥ ४७३॥ तस्मिंस्तमसिसुगाढ नखरैर्दशनैर्निजघ्नुरथशत्रून् । यस्मिन्पश्यति कपयस्तं वालि*रामम्॥ ॥ ४७४॥दृश्यादृश्यांच्छत्रूनवधीद्विशिखैर्हयान्ध्वजांश्चरथान् । यस्सा- वरजोनिशियुधितं वालिज * रामम् ॥ ४७५ ॥ हतहरिरक्षःकायै रभितोव्याप्तांददर्शरणभूमिम्। यस्सावरजोनिशियुधितंवालि * रामम्॥

॥ ४७६ ॥ यमशत्रुमहापार्श्वप्रमृतींचलूनताडयद्द्रिशिखैः । मर्मसुयस्सं क्रुद्धस्तं वालिजदूतमाश्रये रामम् ॥ ४७७ ॥ गोलांङ्गूलाःकपयो राक्षसबृन्दानभक्षयंत युधि । यत्पुरतोभीमबलास्तं वालि * रामम् ॥ ॥ ४७८ ॥ यद्दूतोवालिसुतो दृष्ट्वायुधिरावणिंरथारूढम् । अवधीत्त-द्रथवाहांस्तंवालि * रामम् ॥ ४७९ ॥ हतसारथिवाहोद्राग्यद्दूतेनेन्द्र-जिद्रथं त्यक्त्वा । अन्तरधीयतमायीतं वालि * रामम् ॥ ४८० ॥ अथयःकपिवीरान्गिरमवदद्ध्यूयं कपीश्वरंश्रयत । अयमात्ताब्जजवर इतितंवालिज * रामम् ॥ ४८१ ॥ अथशक्रारिरदृश्यो निशितान्बा-णान्मुमोचनागमयान् । यं सानुजमपिवद्धुं तं वालि * रामम् ॥४८२॥ नागास्त्रेणबबन्धभ्रातासहितं यमिन्द्रजिन्मायी । संवृतगात्रोमेघैस्तं वालि * रामम् ॥ ४८३ ॥ अथ यस्याज्ञावशगानीलांगदशरभजां बवन्मुख्याः । प्रययुस्तंमृगयन्तस्तं वालिजदूत * रामम् ॥ ४८४ ॥ अथवेगवतां वेगं तेषामिषुभिर्न्यवार यन्मार्गे । यद्वेषिसुतः पापीतं वालिज * रामम् ॥ ४८५ ॥ अथ शरभूतैस्सर्पैर्विद्धाद्देहादसुस्रवद्रुधि रम् । यस्याऽनुजसहितस्यचतं वालि * रामम् ॥ ४८६॥ इन्द्रोवाप्य न्योवाकिंकुर्यान्मां मदीयविशिखान्वा । इति यद्विड्जो गर्जत्तंवालि * रामम् ॥ ४८७ ॥ अथनागास्त्रेणतदाबद्धोयस्सानुजोगिरं वक्तुम् । नशशाकविभिन्नांगस्तं वालि * रामम् ॥ ४८८ ॥ निपपातानुज सहितोयोभूम्यां रक्तरूपितावयवः । शरवेष्टित सर्वाङ्गस्तं वालिज * रामम् ॥ ४८९ ॥ शिश्येऽथवीरशयने विज्यं चापं करेसमादाय । योऽनुजसहितो भूमौ तं वालि * रामम् ॥ ४९० ॥ प्रथमंभुविपतितं यं दृष्ट्वाऽग्रजोभवन्निराशोऽसौ । कपयोपि तथाऽभूवंस्तं वालि * रामम् ॥ ४९१ ॥ अस्माकंमूलहरो नत्थों निहतोमयेति यद्विड्जः । राक्षससङ्घानवदत्तं वालि * रामम् ॥ ४९२ ॥ अथनीलमैन्दहनुम-ज्जांबवदाद्यांस्तदाऽभिनद्द्रिशिखैः । यद्विट्पुत्रोऽदृश्यस्तं वालि*रामम्

॥४९३॥ निष्पन्दं दृष्ट्वार्यंनिहतं मत्वासहानुजं रिपवः । यद्विट्पुत्रंतु तुषुस्तं वालि * रामम् ॥ ४९४ ॥ अथ यद्विट्पुत्रोद्रागविशल्लङ्कां प्रहर्षयन्जनकम् । राक्षससंघैस्साहितस्तं वालिज * रामम् ॥ ४९५ ॥ सुग्रीवंबाष्पमुखंदृष्ट्वा नेत्रे जलेनसंसिक्त्वा । यद्भक्तो गिरमभणत्तंवालि* रामम् ॥ ४९६ ॥त्यक्त्वावैक्लव्यं त्वं सैन्यैस्सहितं विचिन्तयाद्येति । यद्भक्तो गिरमभणत्तं वालि * रामम् ॥ ४९७ ॥ संज्ञागमपर्यन्तं रक्ष्यो रामोभवद्भिरत्रेति । यद्भक्तोगिर * रामम् ॥ ४९८ ॥ लक्ष्मी भर्त्यस्यमुखे तस्माच्छोकंत्यजत्वमद्येति । यद्भक्तो गिर * रामम् ॥ ॥ ४९९ ॥ घटकर्णंमत्वामाङ्गावत्सैन्यं भवांश्चपालयतु । इतियद्भ-क्तोऽभाणीत्तं वालि * रामम् ॥ ५०० ॥ अथयद्विट्पुत्रोक्तिंश्रुत्वा रामस्यसानुजस्यवधम् । परिरेभेशक्रजितं तं वालिज * रामम् ॥५०१॥ अथयद्विड्दाशरथेरुत्थितमाशुज्वरं परित्यज्य । मेनेस्वंजितशत्रुंतंवा * रामम् ॥ ५०२ ॥ अथ निभ्युःकपिसंघास्तृणचलनेपि भ्रमादसृक्पा-णाम् । यद्विट्सुतजयसमयेतं वालिज * रामम् ॥५०३॥ अथयद्विड् दशवदनस्त्रिजटाप्रभृतीरुवाच वचनमिदम् । सीतारक्षणकुशलास्तंवा* रामम् ॥ ५०४॥ क्षिप्रं यूयंसीतां पुष्पकमारोप्य दर्शयध्वन्तौ । इति यद्विडवादीत्तास्तं वालिज * रामम् ॥ ५०५ ॥ पश्चात्विन्द्रारिहतौ दशरथपुत्रौविदेह जायुधितौ । इति यद्विडवादीत्तास्तं वालि*रामम्॥ ॥ ५०६ ॥ नान्यामेगतिरितिसामत्वा मां प्राप्स्यति स्वयंकुशला । इति तायद्विडवादीत्तं * रामम् ॥५०७॥ अथ राक्षस्यःपुष्पकमारोप्यै ताविहायसाशीघ्रम् । यत्पत्नींचानैषुस्तं हृत्कमलेस्मराम्यहं*रामम् ॥ ॥ ५०८ ॥ सादृष्ट्वाशरतल्पेयंभर्तारं सहानुजं शयितम् । विललाप-सुदुःखार्तातं हृत्कमले * रामम् ॥ ५०९ ॥ लाक्षणिकानांगीरपि सत्पुत्रिण्यविधवेतिमिथ्याऽभूत् । इति यत्पत्न्यरुदत्सातं हृ * रामम्॥ ॥ ५१० ॥ येमां दीक्षितपत्नीमवदंस्तेऽद्यानृतोक्तयोऽभूवन् । इति

यत्पत्न्यरुदत्सा तं हृत्कमले स्मराम्यहं रामम् ॥ ५११ ॥ अभिषेको भर्त्रासहयैरुक्तस्तेऽनृतोक्तयोऽभूवन् । इति यत्पत्न्यरुदत्सा* रामम्॥ ॥ ५१२ ॥ तीर्त्वाऽपारं सागरसार्यसुतौतौ च गोष्पदे निहतौ । इति यत्पत्न्यरुदत्सा * रामम् ॥५१३॥ तस्याग्नेयं वारुणमस्त्रं वायव्यमद्यकुत्रगतं । इति यत्पत्न्यरुदत्सा * रामम् ॥ ५१४ ॥ नाहंशोचामि तथादशरथपुत्रौ यथाममश्वश्रूम् । इति यत्पत्न्यरुदत्सा*रामम् ॥ ५१५ ॥ नात्मानं जननीं वा शोचामितथा यथामम श्वश्रूम् । इति यत्पत्न्यरुदत्सा *रामम् ॥ ५१६ ॥ इति परिदेवयमानां त्रिजटा वाचं जगाद यत्पत्नीम् । जीवतितवभर्तेतिचतंहृत्कमले * रामम्॥ ॥ ५१७ ॥ शृणु मम वचनं सीते न मृतावेतौ विभाति मुखशोभा । इति सोचेयत्पत्नीं तं हृत्कमले * रामम् ॥ ५१८ ॥ रक्षत्येतौ सेना विस्रब्धा त्वं भवाद्य मद्वचनात् । इति सोचे यत्पत्नीं तं हृत्कमले* रामम् ॥ ५१९॥ गतसत्वानां नृणां भवति मुखे वै कृतं महद्बहुशः। इति सोचे यत्पत्नीं तं हृत्कमले * रामम् ॥५२०॥ यद्येतौ गतसत्वौ पुष्पकमेतन्न धारयेद्विधवाम् । इति सोचे यत्पत्नीं तं हृत्कमले*रामम् ॥ ५२१ ॥ श्रुत्वा गिरममृतमयीं तुष्टाऽस्त्वेवं त्विति ब्रुवाणागाम् । यत्पत्नीवनमविशत्तं हृत्कमले * रामम् ॥ ५२२ ॥ अथ नागपाशबद्धोऽप्युन्मील्य दृशौतदाऽनुजं प्रेक्ष्य । बह्वकुक्षद्द्राग्यस्तं हृत्कमलेस्मरा* रामम् ॥ ५२३ ॥ सीतासदृशी स्त्रीमेलभ्याभ्राता न लक्ष्मणेन समः। इति दीनोऽकुक्षद्यस्तं हृत्कमले * रामम् ॥ ५२४ ॥ त्यक्ष्यामि शरीरमहं सौमित्रिमृतौ न मेऽस्ति जीवाशा । इति दीनोऽकुक्षद्यस्तं हृत्कमले * रामम् ॥ ५२५ ॥ मां वनमनुयातोऽयं तेनसहाऽहं यम क्षयं यामि । इतिदीनोऽकुक्षद्यस्तं हृत्कमले* रामम् ॥ ५२६॥ नकृतो विभीषणोऽयं राजा मिथ्याऽभिभाषणो हंस्याम् । इति दीनोऽकुक्षद्यस्तं * रामम् ॥५२७ ॥ अद्यसखेतरसागरमङ्गदहनुमत्पुरस्सरस्सबलः।

इति दीनोऽकुक्षयस्तं हृत्कमले स्मराम्यहं रामम् ॥ ५२८ ॥ यूयं मदनुज्ञाता गच्छतकपयो यथेच्छमद्यगृहम् । इतियोगामवदत्तान तं हृत्कमले स्मराम्यहं रामम् ॥ ५२९ ॥ श्रुत्वा ते यस्य गिरं कपयः परिदेवनं तदाचक्रुः । बाष्पैः परिपूर्णाक्षास्तं * रामम् ॥ ५३० ॥ आयान्तं यद्भक्तं दृष्ट्वाकपयो गदाधरं शत्रुम् । मत्वा दुद्रुवुरथते तं हृत्कमले * रामम् ॥ ५३१ ॥ शरतल्प शयानौ तौ शूरौद्रष्टुं विभीषणोऽथागात् । यद्भक्तो युद्धभुवं तं हृत्कमले* रामम् ॥५३२॥ सुग्रीवे यं सेनाव्यधिताऽऽस्ते किं निमित्तमिहवदमे । इति यद्भक्तोऽपृच्छत्तं हृत्कमले* रामम् ॥ ५३३ ॥ अथवालिसुतोवादीद्यद्भक्तंपश्यसानुजं रामम् । इन्द्रजिदस्त्रैर्हतमितितं हृत्कमले * रामम् ॥ ५३४ ॥ इत्यं गद्गदितगिरं श्रुत्वाव्यधितोऽश्रुपूर्णनयनोयम् । यद्भक्तोपश्यद्भक्तं हृत्कमले * रामम् ॥ ५३५॥ अथयत्सुहृदाप्रोक्तो दिग्भ्यःसेनाःपुपोषधावन्तीः । ऋक्षपतिस्सौम्यगिरातं हृत्कमले * रामम् ॥ ५३६ ॥ अथशरभिन्नंगात्रं दशरथसुतयोःप्रगाढमालिङ्ग्य । यद्भक्तोऽरुदुच्चैस्तं हृत्कमले * रामम् ॥ ५३७॥ जीवन्नद्यविपन्नो नाथाहंनष्टराज्य चिन्तोऽस्मि । इति यद्भक्तोऽरोदीत्तं हृत्कमले * रामम् ॥ ५३८ ॥ इतिबहुविलपन्तंतं यत्सुहृदूचेवचस्तदाऽऽलिङ्ग्य । प्राप्स्यति राज्यं त्वामितितं हृत्कमले * रामम् ॥ ५३९ ॥ त्यक्त्वामोहमिमौद्यौ दशवदनन्द्राघ्धनिष्यतस्सबलम् । इतितं यत्सुहृदभणत्तं हृत्कमले * रामम् ॥ ॥ ५४० ॥ संगृह्येमौगच्छत्वं किष्किन्धां सुषेणकपिसैन्यैः । इति तं यत्सुहृदभणत्तं हृत्कमले * रामम् ॥ ५४१ ॥ हत्वादशवदनमहं सगणंसीतां समानयामिद्राक् । इति तं यत्सुहृदभणत्तं हृत्कमले* रामम् ॥ ५४२ ॥ यत्सुहृदोक्तंवचनं श्रुत्वातच्छ्वशुर आहगिरमेताम् । ओषध्याहरणेच्छुस्तंहृत्कमले * रामम् ॥ ५४३ ॥ आज्ञापयहनुमन्तं ह्यौषध्यर्थंपयोंबुधिंगन्तुम् । इत्याहसयत्सुहृदंतं हृत्कमले * रामम् ॥

तस्मिंत्समये गरुडश्शरबद्धं यंसहानुजंप्रेक्ष्य । हस्ताभ्यां मुखममृशत्तं हृत्कमले स्मरम्यहं रामम् ॥ ५४५॥ तत्संस्पृष्टारु रुहुस्सावरजस्यत्र णास्तदायस्य । शक्रजिदिषुसंजातास्तं हृत्कमले * रामम् ॥ ५४६ ॥ वदकस्त्वमितिसपृष्टो गरुडोऽवादीद्वचस्तदानींयम् । प्राणसमस्सुहृद- हमितितं हृत्कमले * रामम् ॥ ५४७ ॥ कद्रूप्रभवास्सर्पाश्चासन्माया- विदश्शरास्तस्य । इतियंगरुडोऽवादीत्तं हृत्कमले * रामम् ॥५४८॥ देवासुरगन्धर्वाश्शक्तानभवन्त्यमून्विमोक्षयितुम् । इतियं गरुडोऽवा* रामम् ॥ ५४९ ॥ वृत्तान्तमिमं श्रुत्वात्वरयाऽद्याऽहं समागतोऽस्म्य- धुना । इति यं गरुडोऽवादीत्तं हृत्कमले ॥ ५५० ॥ भवतांबलमृजु- भावस्त्वे तेषां कूटयोधिनांमाया । इतियंगरुडोऽवादीत्तं योगिस्वा न्तवासमहमीडे ॥ ५५१ ॥ इत्युक्त्वाऽलिङ्ग्यततोगच्छामिसखेत्वयाऽ भ्यनुज्ञातः । इतिसयमुक्त्वाप्रययौ तंयोगिस्वान्तवासमहमीडे ॥ ॥ ५५२ ॥ कुतुकन्नचकार्यन्ते सखितांप्रति राघवाऽद्यवेत्स्यसिच । इतिसयमुक्त्वाप्रययौ तं योगि * मीडे ॥ ५५३ ॥ हत्वादशवदनं त्वं सीतासहितःप्रयास्यसिस्वपुरीम् । इति सयमुक्त्वाप्रययौतंयोगि* मीडे ॥ ५५४ ॥ अथयं विरुजं सानुजमुद्वीक्ष्यतदावनौकसोभेरीः । जघ्नुर्दध्मुश्शंखं तं योगि * मीडे ॥ ५५५ ॥ लङ्काद्वाराणि ययुः कपयो यन्नित्र पालितास्सहसा । योद्धुंराक्षससंघैस्तं योगि * मीडे ॥ ॥ ५५६ ॥ वानरकृतसिंहरवांश्श्रुत्वायाद्विट्प्रशंकितस्वान्तः । अवद- द्राक्षसवीरांस्तं योगि * मीडे ॥५५७॥ वानरतोषेहेतुं दृष्ट्वायांतत्व- रान्विताब्रूत । इतितानवदद्यद्विट्तंवैदेहीप्रियं भजे रामम् ॥ ५५८ ॥ अथतेदृष्ट्वागत्यप्रोचुर्वाचंतदैवयस्यरिपुम् । तौद्वौदृढगात्रावितितं वैदे ही*रामम् ॥५५९॥ श्रुत्वेत्थं यद्वेषीधूम्राक्षं राक्षसंचसेनान्यम् । आज्ञा पयदथयोद्धुं तंवै *रामम् ॥ ५६०॥ अविगणयन्नपशकुनं यद्विट्प्रहि- तस्सपश्चिमद्वार्स्थम् । हनुमन्तमताडयदथतं * रामम् ॥ ५६१ ॥ अथ

मथितं कपिवीरैर्यद्विट्सैन्यं शिलायुधैर्युद्धे । धूम्राक्षोऽप्य द्राक्षीत्तं वैदेहीप्रियं भजे * रामम् ॥ ५६२ ॥ दृष्ट्वायन्मित्रबलं तरु गिरिहस्तं क्रुधाचधूम्राक्षः । विशिखैस्तीक्ष्णैरभिनत्तंवै * रामम् ॥५६३॥ यद्विडनीकपनिहताः कपयःपेतुर्विभिन्नहृदयाङ्गाः । बहवोयुद्धधरण्यां तंवै * रामम् ॥ ५६४ ॥ वानरराक्षससैन्यं युयुधेऽन्योन्यं द्वयंजयेच्छुतदा । संपश्यति यद्दूतंतं वै * रामम् ॥ ५६५ ॥ अथयद्दूतःक्रुद्धस्संगृह्यशिलां रथोपरिक्षिप्त्वा । साश्वंस्यन्दनमभिनत्तंवै * रामम् ॥ ५६६ ॥ नखतरुगिरिपाषाणैरक्षस्सैन्यं प्रमथ्यचयद्दूतः । अथतमहन्धूम्राक्षंतं वै * रामम् ॥ ५६७ ॥ अथ तेनगदाभिहतो यद्दूतोद्रेः प्रगृह्यशिखरंद्राक् । क्षिप्त्वाशिरसितमवधीत्तं वै * रामम् ॥ ५६८ ॥ यद्विट्तंयुधिनिहतं श्रुत्वाक्रुद्धोनिशाचरैश्शिष्टैः । प्रेषयदपरंशूरंतं वै * रामम् ॥ ५६९ ॥ शूरोथवज्रदंष्ट्रो यद्विट्प्रहितस्स्वसैन्य संयुक्तः । अगमद्युद्धभुवंद्राक्तंवै * रामम् ॥५७०॥ चापंविष्फार्योग्रोविशिखानकिरत्सवानरांगेषु । यद्विड्विजयाकांक्षीतं वै * रामम् ॥५७१॥ यद्विट्प्रहितस्यशरैर्विद्धाःकपयो बभूवुरतिभीताः । रुधिरोक्षितसर्वाङ्गास्तंवै * रामम् ॥ ५७२ ॥ यन्मित्रसैन्यनिहतै रक्षःकायैस्समावृताभूमिः । आसीत्समरेभीमातंवै * रामम् ॥५७३॥ यद्विट्प्रहितस्सेनां स्वीयामुद्वीक्ष्यभिन्नसर्वाङ्गाम् । अवधीत्कीशान्विशिखैस्तं * रामम् ॥ ५७४ ॥ रुधिरोक्षितसर्वाङ्गो यद्भृत्यो वालिसूनुरथकुपितः । तदुपरिचिक्षेपतरुंतंवै * रामम् ॥ ॥ ५७५ ॥ अथयद्भृत्यक्षिप्तं वृक्षंबहुधाविभिद्यविशिखैस्सः । भूमावावातरद्राक्तंवै * रामम् ॥५७६॥ अथयद्भृत्यश्शैलंविपुलंसंगृह्यतस्यमूर्ध्नितदा । प्रक्षिप्यननादोच्चैस्तंवै * रामम् ॥ ५७७ ॥ अथयद्भृत्यक्षिप्तं शैलंदृष्ट्वागदांकेरधृत्वा । भूमौसचसमतिष्ठत्तं वैदेही * रामम् ॥५७८॥ अथशैलेनान्येनक्षिप्तोयद्विड्बलाधिपोभूमौ । संमूर्च्छ्योदस्थाद्द्राक्तंवै * रामम् ॥ ५७९ ॥ अथतद्गदयाविद्धस्संमूर्च्छ्योत्थायतच्छिरोच्छित्त ।

असिनायद्भृत्योद्राक्तंवैदेहीप्रियंभजे रामम् ॥ ५८० ॥ अथवज्रदंष्ट्र
मरणंश्रुत्वायद्विड्जगादयुद्धार्थम् । गच्छेत्यकंपनं द्राक्तंवै * रामम् ॥
॥५८१॥ त्वरितंसबलस्सरथी यद्विड्विजयं प्रकांक्षमाणस्सन् । प्रागा
द्युद्धभुवंद्राक्तंवै * रामम् ॥५८२॥ यद्विट्प्रहितस्याभूद्वामेनयनेभुजेपदे
स्फुरणम् । आधिर्व्याधिश्शीर्वेत्तंवै * रामम् ॥ ५८३ ॥ अथतुमुलं
युद्धमभूद्यद्विट्सैन्ययोर्द्वयोर्बलिनोः। अन्योन्यंविजयेच्छ्वोस्तं* रामम्॥
॥ ५८४ ॥ तस्मिंस्तुमुलेयुद्धे जघ्नुर्विटपाद्रिदण्डमुसलाद्यैः । यद्विट्से
न्यं कपयस्तं वै * रामम् ॥ ५८५॥ तस्मिंस्तुमुलेयुद्धे रात्रिचरास्तेऽस्त्र
शूलशक्त्याद्यैः । यन्मित्रबलं जघ्नुस्तं वैदेहीप्रियंभजे रामम् ॥ ५८६ ॥
अथमैन्दनलौकुमुदोद्विविदश्चैतेचमूमुखेस्थित्वा । जघ्नुर्यद्वेपिबलंतं वैदे*
रामम् ॥ ५८७ ॥ आनीतंसारथिनाऽथारुह्याकंपनोरथंवेगात् । आ-
गाद्यन्मित्रबलंतंवै * रामम् ॥ ५८८ ॥ अथयद्वेपिप्रहितोदृष्ट्वाकपिभिः
कृतंतदाक्रंदनम् । हस्तेचापमगृह्णात्तं वै * रामम् ॥५८९॥ सचतुर्दश
भिर्बाणैर्यद्दूतमकम्पनोहनूमन्तम् । अवधीत्समरेक्रुद्धस्तंवै * रामम् ॥
॥ ५९० ॥ अथवृक्षेणाभिहतो यद्दूतप्रेरितेनभुविपतितः । शमनगृहं
सोऽगाद्राक्तंवैदेही * रामम् ॥ ५९१ ॥ पतितमकंपनमाजौनिहतंदृष्ट्वा
निशाचराःशिष्टा । यद्विषमभिगम्योचुस्तं वै*राम ॥५९२॥ तेषांवचनं
यद्विट्छ्रुत्वाऽवादीत्प्रहस्तमथवचनम् । युद्धार्थं सेनान्यंतंवै*रामम्॥
॥५९३॥ गच्छाम्यहमथवात्वं गत्वातौद्वौविजित्यचायाहि । इत्यवद
त्तं यद्विट्तं वै * रामम् ॥ ५९४ ॥ दानैर्मानैश्चाहं कृतसंमानःप्रयामि
युद्धभुवम् । इतियद्विषमाहसगांतं वै*रामम् ॥ ५९५ ॥ उपकृतिकाले
प्राप्ते प्राणारक्ष्याःकथंभवेयुर्मे । इतियद्विषमाहसगांतं*रामम् ॥५९६॥
इत्युक्त्वाराजानं यद्विट्सेनापतिर्बलाध्यक्षान् । आज्ञापयदनुगन्तुंतं वै*
रामम् ॥ ५९७ ॥ अथसधनुष्काश्शूराधृतकवचास्तोबिनिर्ययुयोद्धुम् ।
यद्विट्सैन्यपवचसातंवै*रामम् ॥५९८॥ यद्विट्सैन्यपमभितश्चेरुःकंकाः

प्रपेतुरुल्काश्च । उच्चैर्नेदुश्वशिवास्तं वैदेहीप्रियंभजेरामम् ॥ ५९९ ॥
आयान्तंतंदृष्ट्वास्मितपूर्वंयो विभीषणंप्रोचे । वदकोयंबलवानितितं वै *
रामम् ॥ ६००॥ अथयद्भक्तोवादीत्सेनापतिरेष राक्षसाधिपतेः । बल
श्रवान्प्रहस्तइतियंतं स्मृतसीतं स्मराम्यहं रामम् ॥ ६०१॥ अथयद्य
द्विट्सैन्येयुयुधातेतेद्रुमाद्रिकरमुसलैः । विशिखगदाप्रासैरपितं स्मृत *
रामम् ॥ ६०२ ॥ युद्धेप्रहस्तसचिवा यन्मित्रप्रेषितांश्चकपिवीरान् ।
जघ्नुर्विशिखैर्विविधैस्तंस्मृत * रामम् ॥६०३ ॥ गिरिशिखरेणद्विविदो
यद्विट्प्रहितंनरान्तकंत्ववधीत् । दुर्मुखमपियुधिवेगात्तं स्मृत*रामम् ॥
॥६०४॥ ऋक्षपतिस्त्वथशिलया यद्विट्प्रहितं त्वहन्महानादम् । तारोऽ
पिचकुंभहनुन्तं स्मृत * रामम् ॥ ६०५॥ यद्विट्प्रहितासृक्पायन्मित्र-
प्रेषिताश्चकपिवीराः । तेरुर्युद्धनदीन्द्राक्तंस्मृत * रामम् ॥ ६०६ ॥
अथयन्मित्रप्रहितं नीलंदृष्ट्वाचमूपतिं योद्धुम् । अभ्यागमत्प्रहस्तस्तंस्मृ
* रामम् ॥ ६०७ ॥ यद्द्वेषिसैन्यपालाऽभिहतोनीलोऽथवृक्षमुत्पाट्य ।
प्रजधानचतस्यहयांस्तं स्मृत * रामम् ॥ ६०८ ॥ यन्मित्रसैन्यनाथ
स्तद्धस्तस्थंधनुश्चसंगृह्य । भङ्क्त्वाट्टहासमकरोत्तंस्मृत * रामम् ॥
॥ ६०९ ॥ त्यक्त्वारथंप्रहस्तोयन्मित्रबलाधिपं ललाटतले । मुसले
नाभ्याभिनद्राक्तंस्मृत * रामम् ॥ ६१० ॥ यन्मित्रसैन्यपालो नील-
शिलया विभिद्यतं शीर्षे । शमनगृहातिथिमकरोत्तं स्मृत*रामम् ॥
॥६११॥ अथयद्विड्गृहमापुर्निहतेसैन्याधिपेऽथरात्रिचराः । वक्तुं प्रह
स्तनिधनं तं स्मृत * रामम् ॥ ६१२ ॥ श्रुत्वावचनं तेषां यद्विट्क्रु-
द्धोऽवददिरंसभ्यान् । रथसज्जीकरणार्थंतं स्मृत*रामम् ॥ ६१३ ॥
सज्जंरथमथदृष्ट्वागच्छाम्यहमद्यतौनिहन्तुंद्राक् । इतियद्विड्गिरमवदत्तं
स्मृत * रामम् ॥ ६१४॥ सन्तर्पयामिपृथिवीं राघवकपिसङ्घदेहरक्तौ
घैः । इतियद्विड्रथमभजत्तं स्मृत * रामम् ॥ ६१५ ॥ अद्यास्त्रबाण-
जालैः कपिवृन्दंतौच निर्दहामीति । यद्विड्रथमारुक्षत्तं स्मृत*रामम्॥

॥ ६१६ ॥ यद्विट्प्रययौयोद्धुं रामेणबलैःप्रपूज्यमानस्सन् । त्रिपुरारिर्भूतैरिव तंस्मृतसीतंस्मराम्यहं रामम् ॥ ६१७ ॥ शङ्खमृदङ्गक्ष्वेळितपटहनिनादैर्निशाचरस्तुतिभिः । यद्विट्प्रययौतुष्टस्तं स्मृतसीतं* रामम् ॥६१८॥ वार्षिकनूतननीरदसच्छायःकोऽयमितिचपृच्छन्तम् । द्विट्सहजोयमभाणीत्तं स्मृत*रामम् ॥ ६१९ ॥ द्विरदस्कन्धारूढमकंपनमेनं त्ववेहिराजंस्त्वम् । इत्यभणद्यंभक्तस्तंस्मृत* रामम् ॥ ६२० ॥ एषमृगराजकेतुश्शक्रारिस्स्यन्दनस्थ आयाति । इत्यभणद्यंभक्तस्तं * रामम् ॥ ६२१ ॥ धन्विनमपरं रथगतमतिकायं विद्धिराक्षसंबलिनम् । इत्यभणद्यं* रामम् ॥ ६२२ ॥ अथगजमारुह्योन्नतमायान्तंतंमहोदरं वेत्थ । इत्यभणद्यंभक्तस्तं स्मृत * रामम् ॥ ६२३ ॥ एषपिशाचो नाम्नाप्रासकरोभ्येतिपश्यवाजिस्थः । इत्यभणद्यं * रामम् ॥ ६२४ ॥ आरूढवृषस्त्रिशिराःपन्नगकेतुश्चकुम्भनामासौ । इत्यभणद्यं *रामम् ॥ ॥ ६२५ ॥ बलवानयंनिकुंभोरथमध्यस्थो नरान्तकोथशृणु ।इत्यभणद्यं भक्तस्तं * रामम् ॥ ६२६ ॥ एषकिरीटीधन्वी राक्षसराजोनगेन्द्रसमकायः । इत्यभणद्यं * रामम् ॥ ६२७ ॥ एतस्याज्ञावशगाश्शक्रयमाद्यादिवौकसोभीताः । इत्यभणद्यंभक्तस्तं * रामम् ॥ ६२८ ॥ इति भक्तोक्तंवचनं श्रुत्वादृष्ट्वारिपुंतमायान्तम् । भक्तंयोऽवददित्थंतंस्मृत* रामम् ॥ ६२९ ॥ दिष्ट्यासमाद्यदृष्ट्योः पदवींप्राप्तश्शरैर्वधं प्राप्तुम् । भक्तंयोऽवददित्थंतं स्मृत * रामम् ॥ ६३० ॥ अद्यविमोक्ष्यामिरुषं सीताहरणप्रभूतमहमाजौ । इतिभक्तंयोऽवादीत्तंस्मृत *रामम्॥६३१॥ मद्दृष्टिपथंप्राप्तः कथमर्हतिजीवितुं विरोध्येषः । इतिभक्तंयोऽवादीत्तं* रामम् ॥ ६३२ ॥ नाहंमुञ्चाम्येनं सप्राणंदृष्टिगोचरमेद्य । इतिभक्तंयोऽवादीत्तंस्मृत * रामम् ॥ ६३३॥ इत्युक्त्वानुजसहितस्सज्यंचापं करेऽगृहीद्योद्राक् । कोपाविष्टश्शतौतं स्मृत * रामम् ॥ ६३४ ॥ तिष्ठतुसैन्यं सज्जं द्वारेद्वारेधृतास्त्रखड्गमिति । सचिवान्याद्विडवादीत्तं

स्मृतसीतं भजाम्यहं रामम् ॥६३५॥ अथदुद्रावद्दशीशो दृष्ट्वायद्द्वेषिणं तदाक्रुद्धः । उत्पाट्यमहीध्रंद्राक्तंस्मृतसीतं भजाम्यहं रामम् ॥६३६॥ विशिखैश्छित्वाशैलंसुग्रीवंतंसमावृणोद्विशिखैः । यद्द्वेष्यथसंक्रुद्धस्तंस्मृ* रामम् ॥ ६३७ ॥ अथयद्विड्बाणहतोभूमौनिपपात वानराधीशः । कूजन्विपरीतमतिस्तं स्मृत * रामम् ॥६३८ ॥ यत्सुहृदं भुविपतितं दृष्ट्वातुष्टान्निशाचरान्प्रेक्ष्य । कपयोध्नंस्तं वृक्षैस्तंस्मृत*रामम् ॥६३९॥ गजगवयगवाक्षादीन्कीशांच्छैलान्प्रवर्षतःप्रेक्ष्य । यद्विडहन्बाणैस्तांस्तं स्मृत * रामम् ॥६४० ॥ यद्विड्विशिखैर्निहताःकपयोबलिनश्चमूमुखे न्यपतन् । रुधिरोक्षितसर्वाङ्गास्तं स्मृत * रामम् ॥ ६४१ ॥ अथ दृष्ट्वाकपिकदनं दशकण्टकृतं गृहीतकोदण्डः । योद्धुंद्राग्यःप्रययौतं स्मृत * रामम् ॥ ६४२ ॥ अथविहिताञ्जलिरनुजोयोद्धुंतेनाहमद्यग च्छामि । इत्यवदद्यंज्येष्ठन्तं स्मृत * रामम् ॥६४३॥ अनुजस्यवच श्श्रुत्वा भवयत्नपरस्त्व मद्यसङ्ग्रामे । इत्याज्ञामकरोद्यस्तं स्मृत*रामम् ॥ ६४४ ॥ यत्नाद्दृष्ट्याधनुषा रक्षात्मानं समाहितोभूत्वा । इत्याज्ञा* ॥६४५ ॥अभिवाद्यततोरामं करधृतचापोबलीक्रुधाऽगच्छत् । युद्धभुवं यदवरजस्तं स्मृत ॥ ६४६ ॥ शरजालानि निवार्योत्प्लुत्यरथंयद्विषोऽ थगत्वातम् । उच्चेवाचं हनुमांस्तं स्मृत * रामम् ॥ ६४७॥ धातुर्वर लब्धन्तेऽवध्यत्वमहंप्रणाशयामि कपिः । इतियद्दूतोऽभाणीत्तं स्मृत* रामम् ॥ ६४८ ॥ विधमिष्यतितेप्राणांश्चिरकालस्थान्सदयिदक्षकरः। इतियद्दूतोऽभाणीत्तं * रामम्॥ ६४९ ॥ अक्षंस्मरपुत्रं त्वं मूढेत्युक्तो जघानयद्विट्तम् । वक्षसिहस्तेनतदातं स्मृतसीतंभजाम्यहं रामम् ॥ ॥६५०॥यद्वेषिकराभिहतो हनुमान्स्थित्वाक्षणं स्वहस्तेन । वक्षसि तमहन्क्रोधात्तं श्रितकल्पद्रुमाश्रये रामम् ॥ ६५१ ॥ तेनाभिहतोयद्वि ण्मर्मणिवेगात्पपातरथमध्ये । जनयन्मुदममराणांतं श्रित * रामम् ॥ ॥६५२॥ अथयद्वेषिक्षिप्तैर्विशिखैस्सन्ताडितश्चमूनाथः । तंशैलेनाऽह-

R S V L 15744

न्द्राक्तं श्रितकल्पद्रुमाश्रेय रामम् ॥ ६५२ ॥ अथनालस्स्वशरीरंह्रस्वं कृत्वाऽऽरुरोहसामर्थ्यात् । यद्विड्रथकेत्वग्रंतंश्रितकल्पद्रुमाश्रेयरामम् ॥ ६५४ ॥ अथधनुषोऽग्रंप्राप्योत्प्लुत्यततो यद्विषः किरीटाग्रम् ।नील स्सननाटमुदातंश्रित * रामम् ॥ ६५५ ॥ अथयद्वेष्याग्नेयं सन्धाया स्त्रं वधायनीलस्य । अमुचत्क्रुद्धोवेगात्तं श्रित * रामम् ॥ ६५६ ॥ अथयन्मितबलेशःपितृमाहात्म्यात्स्वतेजसाप्याजौ । नममाराऽऽग्नेया स्त्रात्तंश्रित * रामम् ॥ ६५७ ॥ अथयद्वेषीनीलं संज्ञाहीनं कपिंतदा त्यक्त्वा । सौमित्रिमथारौत्सीत्तंश्रित * रामम् ॥ ६५८ ॥ अथदश- वदनविसृष्टान्विशिखान्विशिखैःप्रसथ्ययदवरजः । विविधान्विशिखा नमुचत्तंश्रित * रामम् ॥ ६५९ ॥ छित्वालक्ष्मणमुक्तान्बाणान्यद्वि- ड्विधातृदशरेण । अवधीत्तं निटिलतटेतं श्रित * रामम् ॥ ६६० ॥ यदवरजोविशिखहतस्तस्यकरस्थं धनुर्विभिद्यद्राक् । त्रिभिरभिनत्तंभल्लै स्तं श्रित * रामम्॥ ६६१ ॥ अथयद्विाण्णिस्ससंज्ञो भूत्वोत्थायक्रुधाप्र चिक्षेप । लक्ष्मणवधायशक्तितं श्रित*रामम् ॥६६२॥ रुद्राऽपिशरैश्श क्तिर्मर्मण्यविशद्विधातृवरलब्धा । यदवरजस्यतदानींतंश्रित* रामम्॥ ॥ ६६३ ॥ वैष्णवभागग्राप्तं देहंतस्यप्रचाल्य यद्वेषी । उद्धर्तुमनीशोऽ भूत्तं श्रित * रामम् ॥ ६६४ ॥ अथयद्दूतोहनुमान्क्रुद्धस्तंमुष्टिनाभिह त्यहृदि । भूमावपातयद्राक्तंश्रित * रामम् ॥ ६६५ ॥ अथहनुमान्सौ मित्रिं दशमुखशक्त्यर्दितंस्वहस्ताभ्याम् । अनयद्यस्यसमीपं तंश्रित * रामम् ॥ ६६६ ॥ संज्ञांलब्ध्वासमरेनिघ्नन्तं वानरान्दशास्यंयः। प्राद्र द्रवदथकोपात्तं श्रित * रामम् ॥ ६६७ ॥ अथहनुमद्वचनाद्यस्तत्पृष्ठ- गतस्तदाऽद्रवच्छत्रुम् । करधृतकोदण्डोद्राक्तंश्रित*रामम् ॥ ६६८ ॥ तिष्ठत्वंममपुरतस्त्वमकार्यरुचिर्नजीवितुंयोग्यः । इति शत्रुमवादीद्य- स्तं श्रित * रामम् ॥ ६६९ ॥ अद्यजनस्थानहतान्द्रक्ष्यसिशीघ्रं त्वमे त्यशमनगृहम् । इतिशत्रुमवादीद्यस्तं श्रि*रामम् ॥६७०॥ इत्थंराघव

वचनंश्रुत्वाक्रुद्धो जघानयद्दूतम् । हनुमन्तं दशवक्त्रस्तंश्रितकल्पद्रु-
माश्रये * रामम् ॥६७१॥ दृष्ट्वारावणविद्धंदूतं क्रुद्धोजघानरथसहितम् ।
सूतमरेरसिमपियस्तं श्रित* रामम् ॥ ६७२ ॥ अथतद्रक्षसिसुदृढेवि-
स्तीर्णेदन्तिदन्ताकिणसहिते । निचखानशरंद्राग्यस्तंश्रित * रामम् ॥
॥६७३॥ वज्राशनिपतनादप्यक्षुब्धोयस्सचापमत्याक्षीत् । यद्बाणाभि
हतोयुधितं श्रित * रामम् ॥ ६७४ ॥ तंविह्वलमाजौयः प्रसमीक्ष्याऽ
थार्धचन्द्रविशिखेन । मकुटंतस्याश्वभिनत्तं श्रित* रामम् ॥ ६७५ ॥
श्रान्तंत्वां प्रेक्ष्याऽहं त्वत्प्राणहरं शरंनमुञ्चामि । इतितमभाणीद्योगा-
न्तं श्रित* रामम् ॥ ६७६ ॥ गत्वाऽद्यपुरींदृष्ट्वाऽऽगत्यश्वस्त्वं प्रपश्य
ममशौर्यम् । इतितममुञ्चद्योरिंतंश्रित * रामम् ॥ ६७७ ॥ इत्युक्तोयद्दे
षीगतहर्षोनष्टचापरथदूतः । पुरमाविशद्गतमकुटस्तंश्रित * रामम् ॥
॥ ६७८ ॥ मर्त्यात्ते भयमस्तीत्युक्तिर्धातुर्भवेत्किमसमर्था । इत्य
व्यथतचयद्विट्तंश्रित * रामम् ॥ ६७९ ॥ अनरण्यभूपवचनं वेदव-
तीवाक्चाकिं भवेद्विवृथा । इत्यव्यथतचयद्विट्तं श्रित*रामम्॥६८०॥
नन्दीश्वररंभोमावरुणभुवां वाक्यमन्यथास्यात्किम् । इत्यव्यधतचय *
रामम्॥६८१॥ अथ सैन्यंयद्वेषिद्वारेद्वारेन्ययुङ्क्तरक्षायै । घटकर्णबोध-
नायचतं श्रित * रामम् ॥ ६८२ ॥ गतनवमेहनिसुप्तंबोधयता वरज-
माहवार्थमे । इति यद्विडवादीद्गान्तं श्रित * रामम् ॥६८३॥ अथ
यद्विड्वचनन्ते श्रुत्वाऽसृक्पाविबोधनायाऽऽपुः । कुंभश्रवणस्यगृहंतं
श्रित*रामम् ॥ ६८४॥ तच्छयनगुहां गत्वायद्विड्वचनात्प्रबोधयाञ्च
क्रुः । तंमुसलाद्यैर्विध्वातांश्रित * रामम् ॥६८५॥ यद्विट्सहजविबोध-
नसक्तायुगपद्विनेदुरुत्कंठाः । रजनिचराधृतदण्डास्तं श्रित * रामम्॥
॥६८६॥ मुसलगदातरुमुद्गरमुष्टिभिरघ्नन्निशाचराःकुपिताः। यद्विट्स
हजं सुप्तंतंश्रित * रामम् ॥ ६८७॥ यद्विट्सहजस्यभृशंश्वासोच्छ्वासैः
प्रपीडितावयवाः । तंरात्रिचराजग्मुस्तंश्रित * रामम् ॥६८८॥ उदकुंभ

तेऽश्वोष्ट्रखरगजाद्यैः कण्टकदण्डांकुशैःकशालगुडैः। यद्वेष्यनुजमसंश्च स्तंश्रितकल्पद्रुमाश्रये रामम् ॥ ६८९ ॥ उदकुम्भशतान्यन्ये मद्य घटान्केचिदभ्यषिञ्चन्त । यद्वेष्यनुजश्रुत्योस्तंश्रित*रामम् ॥ ६९० ॥ केशान्प्रलुलुपुरन्येवारणवृन्दं प्रथावितं चान्यैः । यद्वेष्याज्ञावशगैस्तं श्रित*रामम्॥६९१॥ गतनिद्रःक्षुधयार्तस्सहसोदस्थद्विजृंभमाणस्सन् । यद्वेष्यनुजोऽथवलीतं श्रित * रामम् ॥ ६९२ ॥ विविधान्भक्ष्यान्स-र्वान्मांसश्चादन्पपौचमद्यघटान् । यद्वेष्यनुजोऽथवलीतं श्रित* रामम्॥ ॥ ६९३ ॥ निद्राकलुषितनेत्रो यद्विट्सहजोहसन्नुवाचगिरम् । रात्रि चरांस्तत्रस्थांस्तंश्रित * रामम् ॥ ६९४ ॥ राजाऽऽस्तेकुशली किं व्य सनीवावदतयूयमित्यूचे । यद्विट्सहजस्तान्द्राक्तं श्रित * रामम् ॥ ॥ ६९५ ॥ यद्यस्तिभयं राज्ञो ब्रूततदुत्पाटयाम्यहं त्वितितान् । ऊचे यद्विट्सहजस्तंश्रित * रामम् ॥ ६९६ ॥ अथयूपाक्षस्सचिवो यद्विट्स हजं जगादभयहेतुम् । सीताहरणाज्जातंतं श्रित * रामम् ॥ ६९७ ॥ इत्थंयद्विट्सहजश्श्रुत्वा वाचं जगादयूपाक्षम् । अतिकोपाद्रक्ताक्षस्तं श्रित * रामम् ॥ ६९८ ॥ युधिदाशरथीहत्वापश्चाद्द्रक्ष्यामि राक्षसेश मिति । यद्विट्सहजोऽभाणीत्तं श्रित * रामम् ॥ ६९९ ॥ गिरमथ महोदरोक्तां श्रुत्वायद्वेषिणं तदाद्रष्टुम् । प्रययौकुंभश्रवणस्तंश्रित * रामम् ॥ ७०० ॥ यान्तं दृष्ट्वाद्रिनिभंतं वानरसैन्य भीतिदंक्रूरम् । भक्तंतंयोऽपृच्छत्तंश्रित*राम ॥ ७०१ ॥ कःपर्वतसंकाशोयातिकिरीटी वदाऽद्यलङ्कायाम् । इति भक्तमपृच्छद्यस्तं श्रित * रामम् ॥ ७०२ ॥ इतिपृष्टःप्रत्यभणद्यं भक्तःकुम्भकर्णदौरात्म्यम् । वानरसेनामध्येतं श्रित *रामम् ॥ ७०३ ॥ वैवस्वतजेतारं विध्येनं कुम्भकर्णनामानम्। इति भक्तोयमभाणीत्तं श्रित * रामम् ॥ ७०४ ॥ विश्रवसःपुत्रोऽयं विधिवचनात्सर्वदाऽऽत्तनिद्रोऽभूत् । इतिभक्तोयमभाणीत्तंश्रित*रामम् ॥ ७०५ ॥ इति भक्तगिरं श्रुत्वा नीलं सेनापतिं तदोचेगाम् ।

यस्सेनाराक्षायैतंश्रितकल्पद्रुमाश्रये रामम् ॥७०६॥ तिष्ठन्यूह्यकपीं-
स्त्वं करधृतशैलद्रुमायुधान्वीरान् । इति नलिंयोऽभाणीत्तंश्रित*रामम्
॥ ७०७॥ अथशरभहनुमदंगदमुख्याःकपयस्समाययुर्द्वीरम् । यद्वचनं
श्रुत्वा द्राक्तंश्रित*रामम् ॥ ७०८ ॥ गत्वाथकुम्भकर्णो यद्विट्सदनं
❀ प्रकंपयन्पृथ्वीम् । ज्येष्ठमवन्दत भक्त्यातंभूजा जानिमाश्रयेरामम्
॥ ७०९ ॥ उद्विग्नोप्यथ यद्विट्सहजं दृष्ट्वा समीपमानाय्य । पर्यष्वज
तखभुजैस्तंभूजाजानि * रामम् ॥७१०॥ राजान्किमर्थमधुनाचादृत्या
हंत्वयाविबोधमयाम् । इति यद्विषमाहसगांतंभूजा *रामम् ॥७११॥
इत्थं भ्रातुर्वचनं श्रुत्वायद्विड्जगाद तंवचनम् । वक्तुंवक्तव्यंत्वितितं
भूजा * रामम् ॥ ७१२ ॥ सुखितस्त्वंनाज्ञासीर्ममरामकृतं भयं त्विदं
क्रूरम् । इति तमवादीद्यद्विट्तंभूजा * रामम् ॥ ७१३ ॥ सेतुंबध्वा
जलधावत्राऽऽगच्छत्सलक्ष्मणो रामः । इति तमवादीद्यद्विट्तंभूजा *
रामम् ॥ ७१४ ॥ सुग्रीवस्तव सहजोप्येतौमित्रे बभूवतुस्तस्य । इति
तमवा* रामम् ॥ ७१५ ॥ बलिनोऽसृक्पानिहताः कपिभिर्युद्धेभृशं
बलाध्यक्षैः । इति तमवा * रामम् ॥ ७१६ ॥ कुरुविक्रममद्यत्वंभ्रात्र
र्थे कुम्भकर्ण विश्वासात् । इतितमवा * रामम् ॥ ७१७ ॥ यद्विट्
कृतपरिदेवितमेतच्छ्रुत्वाविहस्यघटकर्णः । तमुवाचवचोऽनीचंतंभूजा*
रामम् ॥७१८॥ मन्त्रविनिर्णयकाले ज्ञातो दोषोमयाद्यसफलोऽभूत् ।
इति यद्विषमाहसगान्तं * रामम् ॥७१९॥ अहितश्चाहिताकारं जल्प-
न्मन्त्रे नरोबहिष्कार्यः । इति यद्विषमाहसगान्तं*रामम् ॥ ७२० ॥
अनुजेनोक्तंपूर्वं कुरुवाक्यंत्वं यदीच्छसिक्षेमम् । इति यद्विष*रामम् ॥
॥ ७२१ ॥ परदाराहरणं यत्तत्सदृशंपापमेव नास्तिभुवि । इतियद्विष
माहसगान्तं भूजा * रामम् ॥ ७२२ ॥ इति कुम्भकर्णवचनंश्रुत्वा-
यद्विट्क्रुधाऽवदत्सहजम् । वाचाप्रस्फुरदोष्ठस्तंभूजा *रामम् ॥७२३॥
मान्योगुरुरिव मांत्वंह्यनुशास्यद्यप्रधानतां प्राप्तः । इतितंयद्वेष्यवदत्तं

भूजाजानिमाश्रये रामम् ॥७२४॥ गतचिन्तनयाऽलन्तेयुक्तमिदानीं
विधीयतांशीघ्रम्। इतितंयद्वेष्यवदत्तं भूजाजानिमाश्रयेरामम्॥७२५॥
गतमुद्दिश्यतुलोके विद्वांसोऽद्यापि नानुशोचन्ति । इतितंयद्वेष्यवदत्तं
* रामम् ॥ ७२६ ॥ अपनयजंदोषंमे प्रीतिश्चेत्वं समीकुरुभ्रातः ।
इतितं यद्वेष्यवदत्तं * रामम् ॥ ७२७॥ अथयद्विषमतिकुपितं ज्ञात्वाऽ
वादीत्तदातुघटकर्णः । रोषंत्यजराजन्नितितंभूजा * रामम् ॥७२८॥
भ्रातृस्नेहादुक्तं वाक्यं श्रुत्वारुषं नकुर्यास्त्वम्। इति यद्विषमाहसगा-
न्तं * रामम् ॥ ७२९ ॥ जीवतिमयिते व्यसनं मास्तुभ्रातर्द्विषं निह
न्म्यधुना । इति यद्विषमाहस * रामम् ॥ ७३० ॥ अद्यमयाऽऽनीतं
त्वंद्रक्ष्यसि शीर्षंमुदाचरामस्य । इतियद्विषमाह * रामम् ॥ ७३१ ॥
अद्याऽहं सुग्रीवं सेनासहितं रणेप्रमथ्नामि। इति यद्विषमाह * रामम्॥
॥ ७३२ ॥ तेनाहंनिहतश्चेद्रामेणत्वंहतोऽसिसगणोद्राक् । इतियद्विष-
माह * रामम् ॥ ७३३ ॥ वज्रिणमपि हस्ताभ्यां शमनं वाऽहंरणेद्यम
थ्नामि । इतियद्विषमाह * रामम् ॥ ७३४ ॥ रामान्मुञ्चभयंत्वं जय-
माहर्तुं व्रजामियुद्धभुवम् । इति यद्विषमाह * रामम् ॥७३५॥ यद्वेष्य
नुजस्यवचःश्रुत्वाऽवोचन्महोदरो भूपम् । शृणुराजन्ममगिरमितितं *
रामम् ॥ ७३६ ॥ एकोजेतुंनालं खरहन्तारंविनासहायमसौ । इति
यद्विषमाह * रामम् ॥७३७॥ संहाद्यहंद्विजिह्वोगच्छामोसौ वितर्दनः
पञ्च । इतियद्विषमाह * रामम् ॥ ७३८ ॥ ज्येष्यामोयुधिशत्रूनथवो
पायै रदामवयमधुना । इतियद्विषमाह * रामम् ॥ ७३९ ॥ अवघोष
यलङ्कायां रामोभ्रातासहाऽद्यनिहतइति । इतियद्विषमाह * रामम् ॥
॥ ७४० ॥ अथसीतावसतिभुवं प्राप्योक्त्वैवंप्रसान्त्वयत्वंताम् । इति
यद्विषमाह * रामम् ॥ ७४१ ॥ नष्टधवाऽनाथासा वशमेष्यतितेस्वयं
सुखप्रेप्सुः । इतियद्विषमाह * रामम् ॥ ७४२ ॥ इति तद्वचनं श्रुत्वा
निर्भर्त्स्यैनं घटश्रवावचनम् । यद्विषमवदज्ज्यष्ठंतं भूजा * रामम् ॥

रामवधात्तवभीतिं भेत्स्याम्यधुनासुखीभवभ्रातः । इति यद्विषमाहस-
गान्तं भूजाजानिमाश्रये रामम् ॥ ७४४ ॥ इतिकुम्भकर्णवाचाभीतं
मत्वामहोदरं प्रहसन् । यद्वेष्यनुजमवादीत्तं * रामम् ॥७४५॥ त्वत्स
दृशोनास्तिसुहृन्ममगच्छत्वं बधायरामस्य । इतितंयद्वेष्यवदत्त* रामम्
॥ ७३६ ॥ भयनाशात्थं निद्रासक्तस्त्वं वैप्रबोधितोऽसिमया । इतितं
यद्वेष्यवदत्तं * रामम् ॥ ७४७ ॥ इत्थं यद्वेष्युक्तःप्रययौ शूलंवहन्करे
वेगात् । घटकर्णस्समरभुवंतंभूजा * रामम् ॥ ७४८ ॥ तिष्ठत्विहमम
सैन्यं सर्वांस्तुकपीन्प्रभक्षयेद्याहम् । इति यद्विषमुक्त्वाऽगात्तंभजरे-
चित्तराघवं रामम् ॥ ७४९ ॥ व्रजसबलस्समरधराभित्युक्त्वाहारमाव
बन्धमुदा । यद्वेष्यनुजस्यगळेतंभजरेचित्त * रामम् ॥७५० ॥ कृत्वा
ऽथसप्रदक्षिणमालिङ्ग्यचयद्विषं तदाज्येष्ठम् । योद्धुमगाद्घटकर्णस्तं
भज*रामम्॥ ७५१ ॥ यद्वेषिकृताशीर्वाक्सेनासहितोऽभणद्घटश्रोत्रः ।
वाचं योद्धुंगच्छंस्तंभज * रामम् ॥ ७५२ ॥ लक्ष्मणसहिते रामेनिहते
सर्वं निहन्मिकपिसैन्यम् । इतियद्विषमुक्त्वागात्तंभजरे * रामम् ॥
॥७५३॥ सोगणयन्नुत्पातांत्सालंपद्भ्यां प्रलंघयित्वाऽगात् । योद्धुंय
द्वेष्यनुजस्तंभजरे* रामम् ॥ ७५४ ॥ यद्वेष्यनुजोदृष्ट्वा वानरसैन्यं
तदाद्रवद्भीत्या । प्रहसन्हर्षादनदत्तं भजरे * रामम् ॥ ७५५ ॥
यत्प्रेष्योंऽगद ऊचे नळनीलगवाक्षमुख्यकपिवीरान् । त्रासादभित्तो
गन्तूंस्तंभजरे*रामम् ॥ ७५६ ॥ रणभुविपलायनंवोयोग्यं किमिमां
बिभीषिकां दृष्ट्वा । इति यत्प्रेष्येऽवादीत्तं * रामम् ॥ ७५७ ॥ आ
गच्छतयूयमिमं विधमिष्यामो वयं बलाद्युक्त्या । इतियत्प्रेष्योऽवा-
दीत्तंभजरे * रामम् ॥ ७५८ ॥ अथतेनिवृत्यकपयो वृक्षैरभिनत्तम-
द्रिशिखरैश्च । यत्प्रेष्योक्त्यास्वबलात्तम्भजरेचित्त*रामम् ॥ ७५९ ॥
यद्विड्भ्रातेक्षिप्ताःकपिभिर्गिरयःप्रचूर्णिताः परितः । रणभुविप्रेतुर्नि-
बिडंतंभजरे * रामम् ॥ ७६०॥ अथवानरसैन्यन्तद्यद्वेष्यनुजोममन्थ

संक्रुद्धः । मधुमत्तो भीमतनुस्तंभजरेचित्त राघवं रामम् ॥ ७६१ ॥
केचित्पतिताजलधौ केचिद्गगनं समाश्रिताःकपयः। यद्वेष्यनुजाद्भी
तास्तं * रामम् ॥ ७६२ ॥ अथयद्दूतोहनुमान्बालिभिर्गिरिवृक्षपाणि-
भिःकपिभिः । सहितस्तमधावदरंतं भजरे * रामम् ॥७६३॥ यद्विट्
सहजोपिगदामुत्क्षिप्याजौनिहत्यकपिवीरान् । रणभुवमवृणोन्निहतै-
स्तं * रामम् ॥ ७६४ ॥ अष्टौषोडशविंशत्रिंशच्छतमप्यदन्कपीन्युद्धे ।
यद्विट्सहजोऽयुध्यततंभज * रामम् ॥ ७६५ ॥ द्विविदोप्यथगिरिणा
तं यद्विड्सहजं बलीसमाविध्य । वाहान् द्विरदांश्चाहंस्तं * रामम् ॥
॥७६६॥ अथगिरिणान्येनायं यद्विट्सैन्यं निहत्यरणभूमिम् । रुधिर
क्लिन्नांचक्रेतं * रामम् ॥ ७६७॥ यद्दूतो गिरिकूटान्विविधान्वृक्षान्व-
वर्ष गगनस्थः । कुम्भश्रवसःशीर्षेतं * रामम् ॥ ७६८ ॥ क्षोभंप्राप्तो
गात्रं रुधिरासिक्तंसवीक्ष्ययद्दूतम् । शूलेनोरस्यभिनत्तं*रामम्॥७६९॥
अथयद्दूतोवक्षसिशूलेनहतो द्विपावमद्रुधिरम् । रणभुव्यनदद्धनुमांस्तं*
रामम् ॥ ७७० ॥ द्रवतोथकपीन्नीलो यन्मितबलाधिपस्समावार्य ।
अरयेचिक्षेपशिलान्तं * रामम् ॥ ७७१॥ अथनीलर्षभशरभप्रमुखाः
कपयोऽद्रिमुष्टितरुपादैः । जघ्नुर्यद्वेष्यनुजंतं * रामम् ॥ ७७२ ॥ यद्वे
ष्यनुजेनतदा प्रहृतेष्वहितेनयुद्धभुवि कपिषु । कपयस्तं परिवव्रुस्तं *
रामम् ॥७७३॥ यद्वेष्यनुजस्याङ्गं गिरिमिवकपयःक्रुधासमारुह्य । जघ्नुः
पादैर्हस्तैस्तं * रामम् ॥ ७७४ ॥ केचिद्दशनैर्नखैर्मुष्टिभिरेकेदपद्भिर
प्यपरे । जघ्नुर्यद्वेष्यनुजंतंभज * रामम् ॥ ७७५ ॥ केशान्प्रलुलुपुरन्ये
केचिच्छ्रवणेददंशुरथदन्तैः । यद्वेष्यनुजं समरेतं * रामम् ॥ ७७६ ॥
यद्वेष्यनुजःक्रुद्धो बाहुभ्यामथकपीन्प्रगृह्यतदा । दशशतमभक्षयद्राक्तं*
रामम् ॥ ७७७ ॥ अथकपयो निर्जग्मुर्यद्वेष्यनुजस्यनासिकाद्वारात् ।
श्रोत्रद्वाराच्चतदातं * रामम् ॥ ७७८ ॥ यद्वेष्यनुजोपितदारणभूमिं
रक्तमांससंक्लिन्नाम् । कुर्वन्निजघानकपींस्तंभजरे* रामम् ॥ ७७९ ॥

अथभीताःकपयस्ते यद्वेष्यनुजप्रमर्दिताश्शरणम् । जग्मुर्यमनन्यधिय-स्तंभजरे चित्तराघवं रामम् ॥ ७८० ॥ अथखिन्नंकपिसैन्यं दृष्ट्वेन्द्रसुतात्मजःप्रचिक्षेप । शैलंयद्विट्सहजेतं * रामम् ॥ ७८१ ॥ अथ शैलहतःक्रुद्धो यद्विट्सहजोऽक्षिपत्तदाशूलम् । अङ्गदवक्षसिवेगात्तंभ* रामम् ॥ ७८२ ॥ यत्प्रेष्योवालिसुतो दृष्ट्वाशूलं प्रमोचयित्वास्त्रम् । उत्प्लुत्योरसितमहंस्तं * रामम् ॥ ७८३ ॥ संज्ञांलब्ध्वासोप्यथयत्प्रेष्यं मुष्टिनाभिहत्यहृदि । भूमावपातयद्भाक्तं * रामम् ॥७८४॥ तस्मिन्पतितेऽसंज्ञे शूलमुपादायदुद्रुवे सतदा । यन्मित्रं कपिराजन्तं*रामम्॥ ॥ ७८५॥ आयान्तंदृष्ट्वातंयन्मित्रंपर्वतंसमुत्क्षिप्य । आविध्योवाचगिरन्तंभज * रामम् ॥ ७८६ ॥ प्राकृतकपिभिर्निहतैःकाते कीर्तिस्सह-स्वगिरिमेतम् । इत्यमुचद्यद्दूतस्तं * रामम् ॥ ७८७ ॥ अथशैलेनाभिहतःक्रुद्धश्शूलंप्रगृह्य यद्दूते । प्राक्षिपदमरारिर्द्राक्तं * रामम् ॥७८८॥ अथयद्दूतोवेगादुत्प्लुत्यबभंजवैरिणाक्षिप्तम् । तच्छूलं हस्ताभ्यान्तं * रामम् ॥ ७८९ ॥ भग्नमवेक्ष्यसशूलं लङ्कामलयात्प्रगृह्यगुरुशिखरम्। यत्सुहृदमहन्कोपात्तंभज * रामम् ॥ ७९० ॥ अथशैलेनाभिहतंभूमौ पतितं विसंज्ञमरिसहजः । यत्सुहृदंतमगृह्णात्तं * रामम् ॥ ७९१ ॥ यद्वेष्यनुजकरस्थितमेनंहनुमान्समीक्ष्यकपिराजम् । एवंह्यचिचिन्तत्तं* रामम् ॥ ७९२ ॥ अद्यमयानिहतेरौ यन्मित्रं कोपमेवमयिकुरुते । इतिहनुमानचिचिन्तत्तं * रामम् ॥ ७९३ ॥ अप्रीतिश्चभवेन्मयिकीर्तेर्हानिश्चजायते तस्य । इति यद्दूतोऽमन्यततं * रामम् ॥ ७९४ ॥इति यद्दूतस्वान्तोनिश्चित्यचमूंस्वयंररक्षतदा । गच्छन्तमरिंपश्यंस्तं*रामम्॥ ॥ ७९५ ॥ यद्विट्सहजेपिपुरीं प्रविशतिवीथ्यां हिमांबुसिक्तायाम् । कपिराट्श्रमशून्योभूत्तं * रामम् ॥ ७९६ ॥ उपलभ्यतदासंज्ञां शत्रोर्नासां श्रुतीचदशननखैः । अच्छिददथयन्मित्रं तं*रामम् ॥ ७९७ ॥ यद्वेष्यनुजोपि रुषानासाश्रुतिखण्डनाद्रवेस्सूनुम् । क्षिप्त्वाभूमावपिपत्तं

भजेरे चित्तराघवं रामम् ॥ ७९८ ॥ विफलीकृतशत्रुपदा क्रमणस्ता-
रापथं समुत्प्लुत्य । यत्सविधंसग्राषत्तंभजरे चित्तराघवंरामम्॥७९९॥
अथघटकर्णोऽपिपुनारुधिराद्रांगो विवेशरणभूमिम् । योद्धुंयत्पुरतोद्रा
क्तं * रामम् ॥८००॥ यद्वेष्यनुजोपितदावानरसैन्यं बभक्षरणमत्तः।
सप्ताष्टौदशशतमपितं * रामम् ॥ ८०१ ॥ लक्ष्मणविशिखैर्विद्धोप्य-
सकृदतिक्रम्यतं घटश्रवणः । योद्धुंयमगाद्वेगात्तं *रामम् ॥ ८०२ ॥
अथदाशरथिः क्रुद्धोरौद्रंयोस्त्रंप्रयोजयन्धनुषि । व्यसृजच्छत्रोर्हृदयेतं*
॥८०३॥ यस्यास्त्रेणाभिहतोभूमौ क्षिप्त्वागदां सबाणास्त्राम् । आयुध
रहितस्सोऽभूत्तंधिषणेत्वं भजानिशं रामम्॥८०४॥ मुष्टिभ्यामथप
द्भ्यां कदनं चक्रेमहद्घठश्रोत्रः । यद्बाणैर्विद्धतनुस्तंधिषणेत्वं*रामम्॥
॥ ८०५ ॥ अथगिरिशृङ्गं विपुलं शत्रुक्षिप्तंबिभेदनिशितशरैः । योभ
जताम्राधिहरस्तं * रामम् ॥ ॥ ८०६ ॥ अथयत्सहजगिराते कपयो
दृष्टास्तदंगमद्रिसमम् । आरुरुहुर्दृढकायास्तंधिषणे * रामम् ॥८०७॥
तानारूढान्प्लवगान्घटकर्णोऽयं व्यधूनयत्तरसा । यस्मिन्पश्यतिपुरतस्तं
धिषणे * रामम् ॥ ८०८ ॥ आयान्तं पुरतस्तं दृष्ट्वाजनयन्मुदंकपी-
नांयः । करधृतचापोऽतिष्ठत्तं * रामम् ॥ ८०९ ॥ रक्ताप्लुतसर्वाङ्गं
प्रलिहन्तंजिह्वयास्रवद्रुधिरम् । आगतमवदत्तंयस्तं * रामम् ॥ ८१०॥
भवितास्यद्यमयात्वं प्राणैर्हीनो निपत्यरणभूमौ । इतिगिरमवदत्तंयस्तं*
॥ ८११ ॥ इत्युक्तो घटकर्णः प्रोचेवाचं विहस्यभीमरवम् । शृणुमम
गिरमितियं द्राक्तंधिषणे * रामम् ॥ ८१२ ॥ नविराधोनकबन्धो न
खरोहं रामकुम्भकर्णोऽस्मि । इतियमवादीत्सहसंस्तंधिषणे * रामम् ॥
॥ ८१३ ॥ नाहंमारीचोवा वालीवाताटकापि वायोषित् । इतियमवा
दीत्सहसंस्तंधिषणे * रामम् ॥ ८१४ ॥ येनेन्द्राद्याविजितास्तन्मुद्गर
मद्यभातिममहस्ते । इति यमवादीत्सरुषा*रामम् ॥८१५॥ नासाश्रुति
नाशान्मे पीडानाल्पापि जायतेऽसह्या। इतियमवादीत्सरुषातं*रामम्॥

॥८१६॥तववीर्यंदर्शयमे दृष्ट्वाऽहंत्वां प्रभक्षयिष्यामि । इति यमवादी
त्सरुषातंधिषणेत्वंभजानिशं रामम् ॥ ८१७ ॥ इति कुम्भकर्णवचनं
श्रुत्वा कुपितस्ससर्जविशिखान्यः । रक्षःप्राणहरांस्तांस्तं * रामम् ॥
॥ ८१८॥ अथशरताडितमपितं यद्वेष्यनुजं कपीन्विनिघ्नन्तम् । अनि-
लास्त्रेणाहन्यस्तंधिष * रामम् ॥ ८१९ ॥ वायव्यास्त्रेणततः कृत्तोह
स्तःपपातकपिसैन्ये । यद्वेष्यनुजस्यतदातं धिषणे*रामम् ॥ ८२० ॥
अथघटकर्णःक्रोधादुत्पाट्यैकेनबाहुनावृक्षम् । अभिदुद्रावरणेयं तंधिष
णे * रामम् ॥ ८२१ ॥ ऐन्द्रेणास्त्रेणपुनःकृत्तैककरःपपातरणभूमौ ।
यद्विट्सहजेपितदातं धिषणे * रामम् ॥ ८२२॥ अथभुविविवेष्टमानं
वृक्षानशैलान् कपीनसृक्पांश्च । घ्नन्तं तमपश्यद्यस्तंधिष * रामम् ॥
॥ ८२३ ॥ अथतच्चरणौद्वावपि निशिताभ्यामर्धचन्द्रबाणाभ्याम् ।
छिच्छेदतदानींयस्तंधिषणे * रामम् ॥ ८२४ ॥ वडवामुखसदृशंस्वं
वदनंविस्तार्यपार्श्व भागगतम् । अहनत्तं विशिखैर्यस्तंधिषणे * रामम्
॥ ८२५ ॥ प्रतिगृह्याथैन्द्रास्त्रंतस्यशिरःकुण्डलप्रशोभिचयः । प्रचक
र्तामरशलोस्तं * रामम् ॥ ८२६ ॥ यच्छरकृत्तं शीर्षं देवारेस्तन्निप-
त्यजलधिचरान् । ग्राहाद्यानामश्नात्तंधिषणेत्वं * रामम् ॥ ८२७ ॥
येनिहतंयुधिसहजंश्रुत्वारक्षःपतिःशुचाऽरोदीत् । बन्धुस्त्रीजनयुक्तस्तं*
॥ ८२८ ॥ हारिपुदर्पघ्नत्वं दैवाद्यातोऽसिमां विहायमृतिम्। इत्यरुद
द्यद्वेषीतंधिषणे * रामम् ॥ ८२९ ॥ युधिरामेणहतं त्वां दृष्ट्वादेवामुदं
प्रयान्तिखलु । इत्यरुदद्यद्वेषीतं * रामम् ॥ ८३० ॥ तवहन्तारंरामं
हन्मिनचेन्मेऽद्यजीवितं व्यर्थम् । इत्यरुदद्यद्वेषीतंधिष * रामम् ॥
॥ ८३१ ॥ निहतेत्वय्यनुजेमे कथमिवदेवानहं विजेष्यामि । इत्यरु-
दद्यद्वेषीतं * रामम् ॥८३२॥ यद्वेषिविलापमिमं श्रुत्वात्रिशिरागिरंच
भाणेमाम् । व्यसनंत्यजराजन्निति तंधिष * रामम् ॥ ८३३ ॥ त्रिशिरो
वाक्यंयद्विट्छ्रुत्वात्मानंकृतार्थमथमेने ।कालेनचोदितस्सचतं*रामम् ॥

देवान्तकोतिकायःप्रययुर्योद्धुं नरान्तकोपितदा । यद्विट्प्रहितावलिन
स्तं धिषणेत्वं भजानिशं रामम् ॥ ८३५ ॥ मायाविद्या निपुणाःपित्रा
यद्वेषिणापरिष्वक्ताः । प्रययुर्युद्धभुवं द्राक्तंधिषणे * रामम् ॥ ८३६ ॥
युद्धोन्मत्तंमत्तंसुतरक्षार्थंन्ययुङ्क्तबलिनौद्वौ। यद्विड्विजयाकांक्षीतंधिष*
रामम् ॥ ८३७ ॥ त्रिशिरःप्रमुखास्सर्वे रथमारुरुहुर्गृहीतचापास्त्राः ।
यद्विट्सन्तोपकरास्तं * रामम् ॥ ८३८ ॥ स्वेषांशत्रूणांवा निश्चित्य-
मृतिंतथाजयापजयौ । प्रययुर्यद्विट्तनयास्तं धिष * रामम् ॥ ८३९ ॥
यद्विट्तनयान्कपयो दृष्ट्वाऽऽयांतोगृहीततरुशैलाः । कोपादुच्चैर्नेदुस्तं *
॥ ८४० ॥ अथयद्वेषिसुतास्ते विशिखैरस्त्रैर्गदासिपरिघाद्यैः । जघ्नुर्यु-
धिकपिवीरांस्तंधिषणे * रामम् ॥ ८४१ ॥ अथयद्वेषिकुमारान्कपिवी-
राजघ्नुर,हवेक्रुद्धाः । तरुभिर्गिरिभिर्मुसलैस्तं धिषणेत्वं * रामम् ॥
॥ ८४२ ॥ अथरथगजहयसंस्थान्रात्रजानिचरान्जघ्नुरद्रिभिर्वृक्षैः । कप-
यो यन्मित्रगिरातंधिषणे * रामम् ॥ ८४३ ॥ यद्वेषिसुताविशिखैरस्त्रै
रसिभिर्गदाभिरथमुसलैः । जघ्नुर्युधिकपिसिंहांस्तं*रामम् ॥८४४॥ य
द्विट्पुत्राश्चपुनःकपिभिर्जघ्नुस्तदाकपीन्समरे। बलिनोबलिनोऽसृक्पास्तं
धिष*रामम्॥८४५॥ अथयद्विट्पुत्राणां द्विरदैर्द्विरदान्हयैर्हयांश्चाघ्नन् ।
हरयो रक्षांसिचतैस्तंधिष * रामम् ॥ ८४६ ॥ यद्विट्सैन्यं नष्टंदृष्ट्वा
सैन्यंवनौकसांजेतृ । देवामुनयस्तुतुषुस्तंधिष * रामम् ॥ ८४७ ॥
अथहयमारुह्यद्रा ग्रणभुविशक्त्यानरान्तकश्शितया । यन्मित्रबलान्य
भिनत्तं धिष * रामम् ॥ ८४८ ॥ आयान्तं प्रासकरं तमरिंहन्तुंसुहृत्त
दायस्य । अङ्गदमनयद्वालिनंतंधिषणे * रामम् ॥ ८४९॥ स चयन्मि
त्रप्रहितो दृष्ट्वोचेतं गिरंतदाशत्रुम् । मयिदर्शयतवबलमितितंधिषणे*
रामम् ॥ ८५० ॥ श्रुत्वा यत्प्रेष्यगिरं क्रुद्धोऽथनरान्तकस्तदाप्रासम् ।
क्षिप्त्वावक्षस्यनदत्तंधिषणे * रामम् ॥ ८५१ ॥ यत्प्रेष्योथनरान्तकम-
वधीद्हृदयेस्वमुष्टिनाऽऽहत्य । तोपकरस्त्रिदशानान्तंसमरबुद्धेसुख-

प्रदं रामम् ॥८५२॥ अथदृष्ट्वानिहतन्तं त्रिशिरादेवान्तकोमहाजठरः।
यत्प्रेष्यं परिवव्रुस्तंस्मरयुद्धेसुखप्रदं रामम् ॥ ८५३ ॥ अथतैस्त्रिभिरे
काकीयत्प्रेष्योऽभिद्रुतोऽपिपरिघाद्यैः । प्रहतोनाव्यथतद्राक्तं* रामम्॥
॥ ८५४ ॥ अथयत्प्रेष्योयुधिगजमुत्प्लुत्याहत्यमुष्टिनानेत्रे । अवपात
यदवनितलेतं स्मर * रामम् ॥ ८५५ ॥ अथतद्विरदविषाणं निष्कृ
ष्यमहोदरं जघानतदा । यन्मित्राग्रजपुत्रस्तं स्मरयुद्धे* रामम्॥८५६॥
देवान्तकोऽथकुपितः परिघेणतदा जघानदृढमाजौ । यन्मित्राग्रजपुत्र
न्तं स्मर * रामम् ॥ ८५७ ॥ जानुभ्यां भुविपतितं त्रिशिरावाणैर्ज-
घानाशिरसिपुनः । यन्मित्राग्रजपुत्रन्तं स्मर * रामम् ॥ ८५८ ॥
तृभिरेकंप्रहतन्तं यद्दुतोवीक्ष्यनीलसहितोद्राक् । तस्मै चिक्षेपाद्रिंतं
स्मर * रामम् ॥ ८५९ ॥ चूर्णिकृत्यतमद्रिंदृप्तोदेवान्तकोऽथयदूतम्।
परिघकरोऽद्रवदाजौतंस्मर * रामम् ॥ ८६० ॥ आयान्तं तं दृष्ट्वा
यदूतोमुष्टिनादृढेनतदा । क्रुद्धोहंच्छिरसिद्राक्तंस्मर * रामम् ॥८६१॥
यदूतमुष्टिघाताद्भिन्न शिरोदन्तनेत्ररसनस्सः । भुव्यपतद्विगतासुस्तं *
रामम् ॥ ८६२ ॥ अथयत्सैन्यपमाजौ नीलंत्रिशिरामहोदरश्चतदा ।
ववृषतुरुरसिपृषत्कांस्तंस्मर * रामम् ॥ ८६३ ॥ संज्ञामुपलभ्यततो
यत्सेनापालकोगिरिं क्षिप्त्वा । मूर्ध्निमहोदरमवधीत्तंस्मर * रामम् ॥
॥८६४॥ दृष्ट्वापितृव्यमरणंत्रिशिराः क्रुद्धोजघानयदूतम् । निशितैर्वि-
शिखैर्बहुभिस्तंस्मर * रामम् ॥ ८६५ ॥ यदूतेनाथहयं निहतंदृष्ट्वाक्रु-
धा तदात्रिशिराः । प्रायुङ्क्तशक्तिमस्मैतंस्मर * रामम् ॥ ८६६ ॥ अथ
यद्दूतश्शक्तितामायान्तीं प्रगृह्यतरसाद्राक् । भङ्क्त्वाद्वेधाव्यनदत्तं *
रामम् ॥ ८६७ ॥ अथतत्खड्गप्रहतःकुपितस्तंमुष्टिनाऽभिहत्यकरे ।
यद्दूतोजगृहेद्राक्तंस्मरयुद्धे * रामम् ॥ ८६८ ॥ तस्यत्रीणिशिरांस्यपि
तत्खड्गेनैवचिच्छिदेस्वबलात् । यद्दूतःप्रथितयशास्तंस्मर * रामम् ॥
॥ ८६९ ॥ यद्विट्प्राहितंमत्तं दृष्ट्वागदयाकपीन्विनिघ्नन्तम् । ऋषभः

पुरतस्तस्थौतंस्मरबुद्धे सुखप्रदं रामम् ॥८७०॥ ऋषभोगदयाभिहतः
क्रुद्धोमत्तंचयद्विपाग्रहितम् । हन्तुं युधिमतिसतनोत्तंस्मरबुद्धेसुखप्रदं
रामम् ॥ ८७१ ॥ तद्गदयैवतदानीं यद्विट्प्रहितंनिहत्यरणमूर्ध्नि । ऋष
भोऽनृत्यन्मोदात्तं स्मर * रामम् ॥ ८७२ ॥ उन्मत्तस्तुगतासुं भ्रात
रमुद्वीक्ष्ययद्विपाग्रहितम् । गदयाद्रागृषभमहंस्तं स्मर * रामम् ॥
॥ ९७३ ॥ गदयाऽभिहतःपतितस्संज्ञां लब्ध्याऽथयद्विपाग्रहितम् ।
तंगिरिणाऽहनृषभस्तंस्मरबुद्धे * रामम् ॥ ८७४ ॥ भ्रातॄन्निहतान्सैन्यै
र्निहतौसहजौच यद्विपःप्रेक्ष्य । अतिकायोयोद्धुमगात्तंस्मर * रामम् ॥
॥ ८७५ ॥ यन्मित्रसैन्यमखिलं दृष्ट्वामेनेऽतिकायमायान्तम् । कुंभश्र-
वणोऽसावितितंस्मर * रामम् ॥ ८७६ ॥ यन्मित्रबलंसर्वं तेनप्रहृतं
द्रुतंसमागत्य । शरणंयंप्रापद्राक्तंस्मर * रामम् ॥ ८७७ ॥ अथरथ-
गतमतिकायं दृष्ट्वायस्सस्मितं तदाऽपृच्छत् । वदकोयमितिस्वहितंतं *
रामम् ॥ ८७८ ॥ दशवदनस्यसुतोऽयं जातोबलवांश्चधान्यमालि-
न्याम् । इति समवादीद्भक्तस्तं * रामम् ॥८७९॥ अतिकायोनाम्ना
ऽयंविधितःप्राप्तरथंश्रितःकवची। आयातीत्याहसयन्तं*रामम्॥८८०॥
देवासुरयक्षाद्याविजिता बहुशोऽप्यनेनबाहुबलात् । इतिभक्तोयमभा
णीत्तंस्मर * रामम् ॥ ८८१ ॥ नयति क्षयमेषशरैर्वानरसैन्यंततोऽस्य
वधमाशु । कुर्वितियंसोभाणीत्तं स्मर * रामम् ॥ ८८२ ॥ अथकपि
भिःप्रक्षिप्तान्गिरिशृङ्गतरून्प्रखण्ड्यतानवधीत् । यद्विट्सुतोतिकायस्तं*
रामम् ॥ ८८३ ॥ अथयमुपेत्यकलापी सधनुर्वचनंसगर्वमवदत्सः ।
दर्शयतवपौरुषमितितंस्मर * रामम् ॥ ८८४ ॥ तद्वाक्यंयत्सहजः
श्रुत्वाऽमर्षात्समुत्पपाततदा । चापकरस्तत्पुरतस्तंस्मर*रामम्॥८८५॥
यत्सहजज्याशब्दं राक्षसभीतिप्रदं तदाश्रुत्वा । व्यस्मयताऽप्यतिका-
यस्तंस्मर* रामम् ॥ ८८६ ॥ बालस्त्वंसौमित्रे गच्छयथेच्छंनयोद्धुम
र्हसिमे । इति यद्विट्सुत ऊचेतंस्मर * रामम् ॥ ८८७ ॥ अथवामम्पुर

तस्त्वं तिष्ठत्वां प्रेषयामिशमनगृहम् । इतियद्बिद्सुतऊचेतंभजबुद्धेसुख प्रदंरामम् ॥ ८८८ ॥ इतितद्वचनंश्रुत्वा यत्सहजोवाक्यमाहतं क्रुद्धः । दर्शयमेपौरुषामितितंस्मर ॥८८९॥अद्यशितामममबाणाः पास्यन्त्युष्णं तवांगरुधिरंद्राक् । इतियत्सहजोऽवादीत्तं * रामम्॥८९०॥ बालोवृद्धो वाऽहंमृत्युंजानीहिसंयुगेस्मिस्ते । इतियत्सहजोवादी* रामम् ॥८९१॥ इतियत्सहजगिरं सश्रुत्वाक्रुद्धश्शरंप्रचिक्षेप । तस्मैशितमतिकायस्तं * रामम् ॥ ८९२ ॥ यद्विट्पुत्रक्षिप्तंबाणंसौमित्रिरर्धचन्द्रेण । अच्छिद-दतिकोपाद्राक्तंस्मर* रामम् ॥ ८९३ ॥ कृत्तंस्वशरंदृष्ट्वा क्रुद्धोबाणान्स सर्जपश्चपुनः । यदवरजाथचसतदातंस्मर* रामम् ॥ ८९४ ॥ तान प्राप्तान्विशिखैश्छित्वानिटिलेतदाजघानरुषा । विशिखेनचयत्सहज-स्तंस्मर * रामम् ॥ ८९५ ॥ यत्सहजक्षिप्तशरप्रहतश्शत्रुर्विचिन्त्यागिर मूचे । बलवानसिमेरिपुरितितंस्मर * रामम् ॥८९६॥ उक्त्वेत्थंरज-निचरो निशितान्व्यसृजच्छरानसंख्यातान् । यत्सहजाथक्रुद्धस्तंस्मर* रामम् ॥ ८९७ ॥ यत्सहजोऽसंभ्रान्तो विशिखैर्विशिखान्विपक्षवि-क्षिप्तान् । चूर्णानकरोत्समरेतंस्मर * रामम् ॥ ८९८ ॥ अथकुपित स्त्रिदशारिर्निशितं विशिखं प्रगृह्ययत्सहजम् । प्रायुङ्क्तोरोमध्येतंस्मर* रामम् ॥ ८९९ ॥ अथरुधिराक्तशरीरोयत्सहजोऽस्त्रंप्रगृह्यचाग्नेयम् । प्रायुङ्क्तारौतस्मिंस्तंस्मर * रामम् ॥९०० ॥ यद्विट्तनुजोऽपितदासौरं चास्त्रंप्रयुज्यधनुषिद्राक् । आग्नेयंतन्यरुधत्तंसेवेभक्तवत्सलं रामम्॥ ॥९०१॥ अरिणाविद्धोमर्मणियत्सहजः प्राप्यचेतनांशत्रोः । सूतंकेतुं विभिदेतंसेवेभक्त * रामम् ॥ ९०२ ॥ ब्राह्मणास्त्रेणैनंभिन्धित्वमिति प्रभञ्जनोक्तवचः । अश्रौषीद्यदवरजस्तंसेवे*रामम् ॥ ९०३ ॥ ज्ञात्वा ऽवध्योरच्छदसेनंवायोर्गिराचयत्सहजः । अयुजद्धनुषितदस्त्रं तं सेवे * रामम् ॥ ९०४ ॥ दृष्ट्वाऽऽगतमस्त्रं तत्सविधेनिशितैश्शरैरुरोधद्राक् । यद्विट्तनुजोपितदातंसेवे * रामम् ॥ ९०५ ॥ अथ यद्विट्तनुजशरा-

न्मोघान्कृत्वा चकर्तमकुटयुतम् । तस्यशिरोब्रह्मास्त्रंतंसेवे भक्तवत्स-
लं रामम् ॥ ९०६ ॥ अथाशिष्टारजनिचरावेगाद्यद्विट्समीपमुपगम्य ।
युधिसुतनिधनमवोचंस्तंसेवे * रामम् ॥ ९०७ ॥ अतिबलमतिकाय-
न्तं युधिविनिपात्यद्रुतं ससौमित्रिः । यत्सविधंसंप्रापत्तंसेवे*रामम् ॥
॥ ९०८ ॥ अथनिहतं सुतमाजौश्रुत्वायद्विड्रुदंस्तदाबहुशः । चित्तेऽ
चिन्तयदेवन्तंसेवे * रामम् ॥ ९०९ ॥ तंमन्येरघुवीरंनारायणमाश्व
नामयं देवम् । इत्यमनुतयद्वेषीतंसेवे * रामम् ॥ ९१० ॥ इत्थंपुत्रा
न्भ्रादृन्निहतान्मनसाविचिन्त्ययद्वेषी । उच्चैर्व्यरुदद्व्यसनात्तंसेवे*रामम्
॥ ९११ ॥ प्रलपन्तंपितरमथोशोकार्णवमग्नमाशुतं प्रेक्ष्य । यद्विड्जो·
गिरमवदत्तंसेवे * रामम् ॥ ९१२ ॥ मयिजीवतितातत्वं मोहंप्रति
गन्तुमेव मर्हसिकिम् । इत्यूचेयद्विड्जस्तंसेवे * रामम् ॥ ९१३ ॥
सानुजकोशिंरामंपश्यत्वं मच्छरैर्विशीर्णतनुम् । इति यद्विषमाहसुतस्तं
सेवे * रामम् ॥ ९१४॥ इत्युक्त्वाशक्रारिर्यद्विट् पुत्रस्समारुरोहरथम् ।
अत्युत्तमखरयुक्तंतं सेवे * रामम् ॥ ९१५ ॥ प्रस्थितमनुजग्मुस्तं य-
द्विट्प्राहितास्सुरारयोबहवः । करधृतधनुरसिपरिघास्तंसेवे * रामम् ॥
॥९१६॥ अश्वारूढाः केचिद्रथखरपृष्ठस्थिताःपरेयोधाः । यद्विड्वचना
त्प्रययुस्तंसेवे * रामम् ॥ ९१७॥ पितृविहिताशीर्वचनो यद्विट्पुत्रो
रथन्तुसंस्थाप्य । अजुहोदग्निंहविषातंसेवे * रामम् ॥ ९१८ ॥ छागं
कृष्णंहत्वास्वीयजयेच्छुर्जुहाववायुसखम् । यद्विट्पुत्रोभक्त्या तंसेवे *
रामम् ॥ ९१९ ॥ तत्रविभीतकसमिधोरक्तंवसनं जुहावलाजयुतम् ।
याद्विट्पुत्रोज्वलनेतंसेवे * रामम् ॥ ९२० ॥ करधृत चापगदासिर्ग-
गनेऽदृश्योभवन्स्वयंविशिखैः । यन्मित्रबलान्यवधीत्तंसेवे * रामम् ॥
॥ ९२१ ॥ यन्मित्रमृषभमंगदमन्यांश्चकपींश्चकार निस्संज्ञान् । इन्द्र
जिदाजौविशिखैस्तंसेवे * रामम् ॥ ९२२ ॥ हनुमन्मैन्दद्विविदज्यो-
तिर्मुखनीलकेसरिप्रमुखान् । अवधीद्यद्विट्पुत्रस्तंसेवे*रामम् ॥९२३॥

अथतच्छरवृष्टिहतस्सावरजोयस्स्वयं विचिन्त्यहृदि । सौमित्रिंगिरमभ
णत्तंसेवे भक्तवत्सलं रामम् ॥ ९२४ ॥ विधिलब्धवरोऽरिरयंनावर्द-
यतिप्लवंगमान्हत्वा । इतियोऽनुजमाहगिरन्तंसेवे * रामम् ॥९२५॥
आवां पतितौदृष्ट्वानिस्संज्ञाविन्द्रजिज्जयीभविता । इतियोनुजमाह *
रामम् ॥ ९२६ ॥ अथयंसानुजमाजौब्राह्मेणास्त्रेणशक्रजिद्भूमौ । वि-
निपात्यपुरमभजत्तंसेवे * रामम् ॥९२७॥ ऋक्षाधिपनीलांगदसुग्री
वाद्यानिरीक्ष्यखंभूमौ । पतितंसानुजमरुदंस्तंसेवे * रामम् ॥ ९२८ ॥
अथकपिसैन्यंदीनंदृष्ट्वा वाचंविभीषणोऽभाणीत् । यद्भक्तःकपिवीरांस्तं
सेवे * रामम् ॥ ९२९ ॥ माभैष्टाविषादोसौ युष्माकंमास्तुराघवौदृष्ट्वा।
इतियद्भक्तोऽवादीत्तंसेवे * रामम् ॥ ९३० ॥ ब्राह्मेणास्त्रेणोभौप्रहतौ
विवशौ बभूवतुस्समरे । इतियद्भक्तोऽवादीत्तंसेवे * रामम् ॥ ९३१॥
अथवैधात्रंचास्त्रं बहुमान्यमरुत्सुतोभ्यधाच्चगिरम् । दृष्ट्वायद्भक्तंद्रा-
क्तंसेवे * रामम् ॥ ९३२ ॥ युधिशत्रुप्रहितशरैः प्रहतानाश्वासयावहै
प्लवगान् । इतियद्भूतःप्रययौ * रामम् ॥ ९३३ ॥ उल्काहस्तो हनु-
मान्यद्भक्तयुतःकपीन्ददर्शहतान् । कृत्तशिरोलांगूलांस्तंसेवे*रामम् ॥
॥ ९३४ ॥ पतितानां गिरिसदृशां प्लवगानां सप्तषष्टिमथकोटीः । तत्र
क्षतयद्भूतस्तंसेवे * रामम् ॥ ९३५ ॥ अमृगयताऽथर्क्षपतिंजरयायुक्तं
प्रजापतेस्तनुजम् । यद्भक्तःकपिमध्येतंसेवे * रामम् ॥ ९३६ ॥ अथ
दृष्टस्सर्क्षपतिर्यद्भक्तं वाक्यमब्रवीत्कृच्छ्रात् । जीवतिवाहनुमानितितं
सेवे * रामम् ॥ ९३७ ॥ तच्छ्रुत्वायद्भक्तः पृच्छसिकस्माद्विहायतौ
प्लवगम् । इतिवृद्धंतमपृच्छत्तंसेवे * रामम् ॥ ९३८ ॥ इतिपृष्टस्सर्क्ष-
पतिश्शृणुवक्ष्येऽहंसहेतुकंवचनम् । इत्याहसयद्भक्तंतंसेवे * रामम् ॥
॥ ९३९ ॥ तस्मिन्जीवतिवीरेनिहताःकपयोनजातुमन्तारः । इत्याहस
यद्भक्तंतंसेवे * रामम् ॥९४०॥ हनुमत्युज्झितजीवे जीवन्तस्स्यामानि
र्गतप्राणाः । इत्याहसयद्भक्तंतंसेवे*रामम् ॥ ९४१॥ एतांजांबवदुक्तिं

श्रुत्वाभक्त्याननाम तत्पदयोः। यद्दूतोवायुसुतस्तंसेवेभक्तवत्सलंरामम्
॥ ९४२ ॥ हरि शार्दूलागच्छत्वन्नस्त्राताभवाऽद्य निहतानाम् ।
इत्याहसयद्दूतंतंसेवे* रामम् ॥ ९४३॥ यद्दूतकण्ठनादं श्रुत्वाऽऽत्मानं
तदैवजातमिव । मेनेद्राग्‌ऋक्षेशस्तंसेवे * रामम् ॥ ९४४ ॥ नान्यंत्व-
दृतेकञ्चनपश्याम्येतन्नपोहितुं कष्टम् । इत्याहसयद्दूतं तं सेवे*रामम्॥
॥९४५॥ एतौविरुजौकुरुताद्दाशरथीत्वं कपींश्चतनुविरुजान् । इत्याह
सयद्दूतंतंसेवे * रामम् ॥ ९४६॥ हनुमन्नर्हसिगन्तुंहिमवत्कैलासशृङ्ग
मध्यतटम् । इत्याहसयद्दूतं तंसेवे * रामम् ॥ ९४७ ॥ तत्रौषधिगि
रिरास्तेतत्रौषधयोविभान्तिबह्वचस्ताः। इत्याहसयद्दूतं तंसेवे * रामम्॥
॥ ९४८ ॥ तत्रचतस्रोभवताचानेतव्याः क्षणेनपवनसुत । इत्याहस
यद्दूतंतंसेवे*रामम् ॥ ९४९ ॥ मृतसञ्जीविन्येकासावर्ण्यकरीविशल्य-
करिणीद्वे । इत्याहसयद्दूतं तंसेवे * रामम् ॥ ९५० ॥ सन्धानकरी-
चान्यानाम्नाशस्ताविभान्तितत्राद्रौ । इत्याहसयद्दूतंतंसेवे * रामम् ॥
॥ ९५१ ॥ ❀ श्रुत्वागिरमृक्षपतेर्मलय गिरिन्तं समारुरोहतदा ।
यद्दूतो वायुगतिस्तंमैथिल्याःपतिंभजे रामम् ॥९५२ ॥ गच्छन्गगन-
पदव्या नगराद्रिनदीरतीत्य यद्दूतः। ओषधिशैलंप्रापत्तं मैथि*रामम्॥
॥९५३॥ अथयद्दूतोऽपश्यन्नोषधिविततीः प्रकुप्यतंशैलम् । उत्पाट्या
ऽऽदायऽऽगात्तंमैथि * रामम् ॥ ९५४ ॥ आगत्यहरिभ्योद्राङ्नत्वाय-
द्भक्तमालिलिङ्गतदा । यद्दूतस्तुष्टमनास्तंमैथि * रामम् ॥ ९५५ ॥
आघ्रायौषधिगन्धं सावरजोयो बभूवनिश्शल्यः । सुहृदाकपिभिस्साकं
तंमैथि*रामम् ॥९५६॥ यद्विट्सैन्यंनिहतं मानार्थं तत्तदातदाजल-
धौ । प्रक्षिप्तंमृतमासीत्तं मैथि * रामम् ॥ ९५७ ॥ यद्दूतागिराकपयो
ऽथोल्काहस्ताः पुरींययूरात्रौ । दग्धुंदशवदनगृहं तंमैथि * रामम् ॥
॥ ९५८ ॥ यद्विट्प्रासादांगणवलभीश्चाश्वोष्ट्रमत्तगजशालाः । उल्का-
भिरधाक्षुस्तेतंमै * रामम् ॥ ९५९ ॥ धूमव्याप्त्यापरितोरुरुदुर्नार्यो

धृतार्भकाःकटचाम् । यद्विट् पुरवासिन्यस्तंमैथिल्याः पतिंभजेरामम् ॥
॥ ९६० ॥ अथ राक्षसभीतिकरं धनुषश्शब्दंकपिप्रतोषकरम् । चक्रे-
यस्सावरजस्तं मैथि * रामम् ॥ ९६१ ॥ यन्मित्रेणादिष्टाहरयोयोद्धुं
गृहीततरुशिखराः । जग्मुर्द्वाराणिपुरस्तं मैथि * रामम् ॥ ९६२ ॥ यः
कुरुतेवितथंममशासनमज्ञातमद्यहन्म्यसिना । इतियत्सुहृदाहकपींस्तं
मैथि * रामम् ॥ ९६३ ॥ अथयद्वेष्यनुजसुतौ कुंभनिकुंभौशशासयु
द्धार्थम् । यूपाक्षाद्यैस्सहितौतंमै * रामम् ॥ ९६४ ॥ यद्विट्सैन्यं
दृष्ट्वाऽऽगच्छत्कपयोयुयुत्सवस्सर्वे । उत्पेतुर्निनदन्तस्तंमै * रामम् ॥
॥ ९६५ ॥ यद्विट् प्रहिताश्शूराश्शस्त्रैरासिभिश्शितैः प्लवङ्गानाम् । ज-
ह्रुश्शीर्षाणितदातंमै * रामम् ॥ ९६६ ॥ तरुशैलाद्यैर्निहतायद्विट्प्रहि
ता रणाङ्कणेपेतुः । हरिभिरसृक्पाश्शूरास्तंमै * रामम् ॥ ९६७ ॥
रिपुणागदयाऽभिहतोयत्प्रेष्योवालिसूनुरथ कुपितः । कम्पनमवधीद्द्वि
रिणातंमै * रामम् ॥९६८॥ निहतं कंपनमाजौ यद्विट् प्रहितस्सशो-
णिताक्षोद्राक् । विन्ध्याघाङ्गदमस्त्रैस्तंमै * रामम् ॥ ९६९ ॥ यन्मि-
त्राग्रजपुत्रस्तस्यरथंचापमाशुगांश्चशितान् । क्रुद्धोऽच्छिददति वेगात्तंमै
* रामम् ॥ ९७० ॥ अथशत्रुकरस्थमसिं वेगादाच्छिद्यतेनतन्निटि-
लम् । यत्प्रेष्योच्छित्ततदातंमै * रामम् ॥ ९७१ ॥ अथ स गदापा
णिर्द्राग्यत्प्रेष्यं वालिजंप्रदुद्राव । आजौसैन्यसमेतस्तंमैथि * रामम् ॥
॥ ९७२ ॥ यूपाक्षोपिरथस्थो यद्विट् प्रहितः प्रजंघसहितोद्राक् । अङ्ग
दमाभिरोद्धुमगात्तं मैथि * रामम् ॥ ९७३ ॥ अथ मैन्दद्विदिदावपि
यत्प्रेष्यार्त्यं समापतुश्शीघ्रम् । तद्रक्षणकामौद्वौतं मैथि * रामम् ॥
॥ ९७४ ॥ द्विविदांगदमैन्दैस्सहयुद्धमकुर्वं स्त्रयोपिरजानिचराः । यद्वे
षिप्रहितास्तेतं मैथि * रामम् ॥ ९७५ ॥ यन्मित्रभ्रातृसुतो दृष्ट्वानि
कटंप्रजंधमायान्तम् । वृक्षेणाती तडदथतंमैथि * रामम् ॥ ९७६ ॥
तस्यकरभ्रष्टमसिं संगृह्याशिरस्तदीयमच्छित्त।यन्मित्रभ्रातृसुतस्तं*रामम्

यूपाक्षःक्षीणेपुस्संत्यज्यरथंधृतासिरागच्छत् । यन्मित्रभ्रातृसुतं तंमै
थिल्याःपतिंभजे रामम् ॥९७८ ॥ द्विविदस्तंयूपाक्षं यद्विट्प्रहितं प्रता
ड्यहृदिकोपात् । जग्राहकरंतस्यचतंमै * रामम् ॥९७९ ॥ अथयद्वेषि
प्रहितो गदयाद्विविदं जघानहृदिकोपात् । आदौसशोणिताक्षस्तंमै *
रामम् ॥९८०॥ अथयद्विट्प्रहितन्तं द्विविदो नखरैर्विदार्यभुव्यापिपत्।
मैन्दोयूपाक्षमहंस्तं मैथि * रामम् ॥ ९८१ ॥ अथ यद्विड्भ्रातृसुतः
कुंभोभूमावपातयद्विविदम् । विशिखैर्मैदमपिद्राक्तं मै*रामम्॥९८२॥
यन्मित्रभ्रातृसुतोदृष्ट्वापतितौ स्वमातुलौ भूम्याम् । अभ्यद्रवदथकुंभ-
न्तं मै * रामम् ॥ ९८३ ॥ आयान्तं तंकुंभःपञ्चभिरन्यैस्त्रिभिश्चवि-
शिखैर्द्राक् । यत्प्रेष्यमहन्क्रुद्धस्तं मै * रामम् ॥ ९८४ ॥ यत्प्रेष्यश्शर
विद्धश्शैलान्वृक्षान्ववर्षतच्छिरसि । कुपितोवालिसुतो द्राक्तंमै*रामम्॥
॥ ९८५ ॥ अथयद्विट्सहजसुतो विशिखैश्छित्वागिरींस्तरूंस्तमपि ।
भ्रूमध्येहन्विशिखैस्तं मै * रामम् ॥ ९८६ ॥ अथरक्तीकृतनेत्रस्सालं
वृक्षंसमूलमुत्पाट्य । तमहन्हृदियत्प्रेष्यस्तं मै ॥ ९८७ ॥ चूर्णीकृत्य
तरुंतं सप्तभिरेनंबिभेदविशिखैर्द्राक् । यद्वेष्यनुजतनूजस्तं मै *रामम् ॥
॥ ९८८ ॥ मोहं प्राप्तमथांगद मरिणाव्यथितं निशम्ययत्प्रहिताः ।
कपयोऽरिं योद्धुमगुस्तं मै *रामम् ॥९८९॥ अथयद्वेष्यनुजसुतं जांबव
दाद्याः कपीन्द्रसंयुक्ताः । गिरितरुहस्तारुरुधुस्तं मै * रामम् ॥
॥९९०॥ क्रुद्धंकुंभंबहुभिस्तरुभिर्गिरिभिर्ववर्षयन्मित्रं। सहजसुतंपाल-
यितुंतंमै *रामम् ॥९९१॥ कुंभेनद्रुमवर्षं छिन्नं दृष्ट्वारुषास यन्मित्रं ।
आक्षिप्यबभञ्जधनुस्तंमै * रामम् ॥ ९९२ ॥ अप्रतिमंकर्मकृतंश्रान्त
स्त्वमसीतिनाऽऽहनन्दयया । इतितं यत्सुहृदभणीत्तं मै * रामम् ॥
॥ ९९३ ॥ इति यत्सुहृदाप्रोक्तः कुंभःक्रुद्धोऽगृहीत्करान्यान्तम् ।

योद्धुंकृतसन्नाहस्तं मै * रामम् ॥ ९९४ ॥ कुंभमथोत्क्षिष्यबलाल्लवणां
भस्यक्षिपत्तदादुष्टम् । तुष्टोयस्येष्टोद्राक्तंमैथिल्या * रामम् ॥९९५ ॥
उत्पत्यततःकुंभो यन्मितंमुष्टिनाजघानहृदि । कपिनिवहमध्यसुस्थंतंमै
थिल्याः पतिंभजे रामम् ॥ ९९६ ॥ अथयत्सुहृदाकुंभः प्रहतोहृदये
समुष्टिनाप्रापत् । विगतासुश्शमनगृहन्तं मै * रामम् ॥९९७॥ दृष्ट्वा
सहजंनिहतंक्रुद्धः परिघंप्रगृह्ययत्सुहृदम् । शिरसिनिकुंभोऽहन्द्राक्तं मै*
रामम् ॥ ९९८ ॥ यद्दूतंपुरतस्थितमथदृष्ट्वोरसिजघानपरिघेण । सनि-
कुम्भोझडितिबलीतं मै * रामम् ॥ ९९९॥ यद्दूतोरसिकठिनेपतितः
परिघो गतस्वरूपोपि । रुजमकरोत्तद्धृदयेतं मै *रामम् ॥ १००० ॥
❀ अथ यद्दूतःक्रुद्धोहृदयेद्राङ्मुष्टिनाऽभिहत्यतदा । भुविविनिपात्यतम
पिषत्तं ममकुलदैवतं भजे रामम् ॥ १००१॥ उत्प्लुत्यतमायान्तंपरि
गृह्यकरेण शीर्षमथतस्य । यद्दूतोऽकृन्तद्राक्तंममकूलदैव * रामम् ॥
॥ १००२ ॥ कुंभनिकुम्भौ निहतौ श्रुत्वायद्विड्प्रचोदयद्बलिनम् ।
खरपुत्रंमकराक्षंतंममकुल * रामम् ॥ १००३ ॥ यद्विपमभिवन्द्यतदा
स्यन्दनमारुह्यसैन्यसंयुक्तः । प्रययौमकराक्षोद्राक्तंमम * रामम् ॥
॥ १००४ ॥ यद्विट् प्रहितं दृष्ट्वाऽऽयान्तंकपयोगृहीततरुगिरयः ।
अभिजग्मुस्तंहृष्टास्तंमम * रामम् ॥ १००५ ॥ यद्विट्प्रहितस्यन्दन
बद्धःकेतुःपपातभुविमार्गे ।सारथिकरगतकशयातंमम*रामम्॥१००६॥
मनासितदविचार्यतदा यद्विट् प्रहितःकपीन्समकराक्षः । अवधीद्विशि
खैःप्रासैस्तं * रामम् ॥ १००७ ॥ तिष्ठत्वं पुरतोममपितृघातकराम-
हन्म्यहंद्राक्त्वाम् । इति यमवोचत्सगिरंतंमम * रामम् ॥ १००८ ॥
दहतिममांगंदुखं दृष्ट्वात्वांतातघातकंदुष्टम् । इतियमवोचत्सगिरन्तं *
रामम् ॥१००९॥ श्रुत्वेत्थंतद्वचनं प्रहसन्वाक्यं तदाऽऽहतंदृष्ट्वा । शत्रु

ध्वान्तरविर्यस्तंमम * रामम् ॥ १०१० ॥ युद्धेनाविनाजेतुं शत्रुर्वा-
चानशक्यते पुंसा । इतितंयःप्राहहसंस्तंमम * रामम् ॥ १०११ ॥
इत्युक्तःखरपुत्रःक्रुद्धोविशिखान्वहून्ववर्ष तदा । अभिलक्ष्यखरारिंयं
तंमम * रामम् ॥ १०१२ ॥ छिन्नान्विशिखान्भूमौ पतितान्कृत्वा-
द्विपाप्रयुक्तांस्तान् । यस्तेनसहायुध्यततंममकुलदैवतं भजे * रामम् ॥
॥ १०१३ ॥ येनारब्धं युद्धंद्रष्टुंदेवास्सकिन्नरागगनम् । परितस्थुर्नागै
स्सहतं ममकुल * रामम् ॥ १०१४ ॥ राक्षसमुक्तान्विशिखान्विशि-
खानकरोच्छरैर्निहत्यतदा । युधियोभिमुखस्थित्वातंमम * रामम् ॥
॥ १०१५ ॥ यन्मुक्तान्वाणौघांश्छिन्नाभिन्नाननेकधाकृत्वा । सववर्ष
पुनर्विशिखांस्तंमम * रामम् ॥ १०१६ ॥ अथराक्षसहस्तधृतं चापं
तद्वाजिसूतरथयुक्तम् । विव्याधशरैर्योद्रात्क्तंमम * रामम् ॥ १०१७ ॥
अथविरथोभुवितिष्ठंच्छूलं विभ्रास्यपाणिनाऽमुञ्चत् । यस्मैमकराक्षो-
द्रात्कं मम * रामम् ॥ १०१८ ॥ वाणैस्त्रिभिरथगगने शूलं छित्वा-
न भोगतान्देवान् । सन्तुष्टानकरोद्यस्तं मम * रामम् ॥ १०१९ ॥
अथमकराक्षंमुष्टिंकृत्वाऽऽयान्तंधनञ्जयास्त्रेण । अभिददुरोमध्येद्रात्कं*
रामम् ॥१०२०॥ दृष्ट्वासैन्यपनिधनं गत्वालङ्कांत्यवेदयद्राज्ञे । यद्विट्
प्रहिताऽशिष्टास्तं मम * रामम् ॥१०२१॥ अथशक्राजितं पुत्रं यद्विट्
प्रोक्त्वा गिरं तदनुकूलाम् । समचोदय दाजिभुवं तंमम * रामम्॥
॥ १०२२ ॥ जहिदाशरथीवीरौ त्वमदृश्योमाययाथवादृश्यः । इति
यद्विट्सुतमाहचतंतं मम * रामम्॥ १०२३॥ इति यद्रेष्युक्तवचःप्रति
गृह्यसुरारिरग्निमजुहोद्द्राक् । पितेविजयं दित्सुस्तं ममकु * रामम् ॥
॥ १०२४ ॥ शरपत्राणि विभीतकसमिधश्शस्त्राणिपावकेऽहौषीत् ।
यद्विट्पुत्रस्तुष्टस्तंमम* रामम् ॥ १०२५॥ रथमन्तर्धानगतंचारुह्यद्रा-

क्छरास्त्रचापयुतः । व्यरुचद्यद्वेपिसुतस्तंममकुल * रामम् ॥१०२६॥
कृत्वासज्यंकार्मुकमथविशिखैर्यंववर्षसावरजम् । दशकण्ठसुतस्समरेतं
मम * रामम् ॥ १०२७ ॥ तच्छरवेगाभिहतो यस्सावरजो धनुःप्रगृ
ह्यकरे । शरमयमकरोद्गगनं तंमम * ॥रामम् ॥१०२८॥ नचपस्पर्श
शरैस्तं यस्सावरजोऽरिमाशुगैर्घ्नन्तम् । अन्तर्धानगतन्तंतं * रामम् ॥
॥१०२९॥ विधिदत्तवरस्समरेविन्याधशरैरदृश्यतां प्राप्तः । यंसानुज
माजिमुखेतंममकुलदैवंतभजे रामम् ॥ १०३०॥ यद्विट्सुतशरानिहताः
कपयःप्रेतुर्गतासवोभूमौ । अमरांशप्रभवा अपितं ममकुल*रामम् ॥
॥ १०३१ ॥ अथसौमित्रिः क्रुद्धोब्राह्मंवास्त्रंत्वहंप्रयोक्ष्यामि । इत्यवद
द्यत्पुरतस्तंमम * रामम् ॥ १०३२॥ तद्वचनंश्रुत्वायः प्रोचेवाचं हि
तायलोकानाम् । एकस्यकृतेमास्त्वितितंमम * रामम् ॥ १०३३ ॥
प्रच्छन्नंशरणागत माजौभीतं निहन्तुमर्हसिकिम् । इतियोनुजमाहगिरं
तंमम * रामम् ॥ १०३४ ॥ इतिवचनं तच्छ्रुत्वा गत्वालङ्कां पुनस्स-
मागच्छत् । यद्विड्भूर्मायावीतंमम * रामम् ॥ १०३५ ॥ पश्चिम
दिग्द्वारिरथे मायासीतायुतेस्थितं शत्रुम् । यद्दूतस्समपश्यत्तं मम *
रामम् ॥१०३६॥ यद्विट्सुतरथचासां मायासीतांतपस्विनींसीताम् ।
अमनुततां पवनसुतस्तंमम * रामम् ॥१०३७॥ ऊपवासकृशादीना
विगतानन्दाविदेहजेयमिति । यद्दूतोऽमंस्ततदातं ममकुल * रामम् ॥
॥ १०३८ ॥ तांसनिरीक्ष्यमुहूर्तं सीतेतिधियाक्रुधारिमरुधत्तम् । कपि
भिस्सहयद्दूतस्तं मम * रामम् ॥ १०३९ ॥ अथ यद्विट्पुत्रस्तां क्रोश
न्तीं रामरामरामेति । मूर्ध्निपरामृशदचिरात्तं मम * रामम्॥१०४०॥
अथ यद्दूतः कुद्धस्त्वांधिक्पापं तवात्रकिंशौर्यम् । इति तमनिन्दीद्बहु-
धातं मम * रामम् ॥ १०४१ ॥ केशस्पर्शोन्यासां स्वात्मविनाशंकरो
तिपुरुषाणाम् । इति यद्दूतोनिन्दीत्तं मम * रामम् ॥ १०४२ ॥

सैषाकिमकुरुतागोवदरे मेपृच्छतस्त्वममरारे । इति यद्दूतोऽनिन्दीत्तं* रामम् ॥ १०४३ ॥ सीतां हत्वेदानीं जीविष्यसिरेकथन्नुपापीत्वम् । इति यद्दूतोऽनिन्दीत्तंमम * रामम् ॥ १०४४॥ इत्थं निन्दन्तंतंहनुमन्तं प्रत्युवाच यद्विड्भूः । स्वकुलध्वंसकरींगांतंमम * रामम् ॥ ॥१०४५॥ हत्वैनां दाशरथीत्वां सुग्रीवं पितृव्यमपिहन्मि । इति यद्विड्जोभाणीत्तं ममकुल* रामम् ॥ १०४६ ॥ इत्युक्त्वायद्विड्भूर्निजघानशितेनतां कृपाणेण । पश्यतिहनुमति कपिभिस्तंमम *रामम् ॥ १०४७ ॥ अथ यद्दूतः क्रुद्धेरक्षस्सैन्यं निहत्यगिरमूचे । गिरितरुहस्तांश्चकपींस्तं ममकुलदैवतं भजे रामम् ॥ १०४८॥ अर्थंविनिवेद्येमंरामे स सखेततःपरं कुर्मः । इति यद्दुतोक्तिरभूत्तंमम * रामम् ॥ ॥ १०४९ ॥ आयातो यद्दूताद्दक्षपतिर्वृत्तमाशुसं श्रुत्य । तमनुययौ सैन्ययुतस्तंमम * रामम् ॥ १०५० ॥ अथहनुमान्यत्सविधंप्राप्यविषण्णोश्रुपूर्ण नयनोद्राक् । सर्वमुदन्तमभाणीत्तं * रामम् ॥१०५१॥ ❀ आजावस्मत्पुरतश्शक्रारिर्जानकींरथेऽनैषीत् । इतियंदूतो वादीत्तं सनकादिस्मृतंभजे रामम् ॥ १०५२ ॥ अथ सचपापीसीतांकरधृतकेशोऽसिनाजघानगळे। इतियंदूतोऽवादीत्तं सन * रामम् ॥१०५३॥ इत्थं स्वदूतवचनंश्रुत्वा यश्छिन्नमूल इव वृक्षः । निस्संज्ञोभुव्यपतत्तं सन * रामम् ॥ १०५४ ॥ अथकपयोभुविपतितंप्रेक्ष्यजलैःपद्मगन्धिभिश्शीतैः । यमसिञ्चन्दुःखार्तास्तंसन * रामम् ॥ १०५५॥ सौमित्रिर्बाहुभ्यां यंपरिरभ्याथदुःखितो वचनम् । हेत्वर्थयुतंप्रोचेतंसन * रामम् ॥ १०५६ ॥ शुभवर्त्मनितिष्ठन्तं नारक्षत्त्वां त्वयाकृतोधर्मः । इति यमभाणीत्सहजस्तंसन * रामम् ॥ १०५७॥ धर्मोयदिसफलोभुविनैवं कष्टं त्वमाप्स्यसिह्यार्य । इति यमभाणीत्सहजस्तंसन*रामम्॥

॥ १०५८ ॥ धर्मविरोधीजीवति दशवदनोऽद्यापि पुत्रपौत्रयुतः। इति यमवादीत्सहजस्तंसन * रामम् ॥ १०५९ ॥ यत्र धर्मोबहुलस्तत्रश्रेयांसिवृद्धिमुपयान्ति । इति यमवादीत्सहजस्तंसन *रामम् ॥१०६०॥ धर्मस्सत्यंशौचं शास्त्रोक्तं चेत्तथापिश्शृणुवक्ष्ये । इति यमवादीत्सहजस्तंसन * रामम् ॥ १०६१ ॥ उत्सृजता राज्यं स्वंछिन्नंमूलंत्वयैवधर्मस्य । इतियमभाणीत्सहजस्तंसन *रामम् ॥१०६२॥ वृद्धेभ्योः ह्यर्थेभ्यः कर्माण्यखिलानि संप्रवर्तन्ते । इति यमभाणीत्सहजस्तं * रामम् ॥ १०६३ ॥ बान्धवमित्राद्या अपिधनिकानामेव भान्तिलोकेऽस्मिन् । इति यमभा*रामम् ॥ १०६४ ॥ यस्यार्थाःसकुलीनोविद्वान्मतिमान्पराक्रमीचगुणी । इति यमभाणी * रामम् ॥ १०६५ ॥ हर्षःकामोदर्पः क्रोधोधर्मोदमश्चधनिनांस्युः । इति यमभाणीत्सहजस्तंसनकादिस्तुतंभजेरामम् ॥ १०६६ ॥ नार्थास्त्वयिदृश्यन्तेसीताऽपहृताऽद्यकष्टमपिजनितम् । इति यमभा * रामम् ॥१०६७ ॥ आर्योत्तिष्ठत्वमहंव्यपनेष्यामीन्द्रजित्कृतं व्यसनम् । इति यमभा * रामम्॥ ॥ १०६८ ॥ अद्यात्मानं त्वंप्रभुमात्मानं नावबुध्यसेकिमिति । इति यमभा * रामम् ॥ १०६९ ॥ इत्थंज्येष्ठाश्वासंकुर्वत्यनुजे चतत्रयद्भक्तः । सचिवैस्सममागच्छत्तंसन * रामम् ॥ १०७० ॥ दृष्ट्वाश्रुमुखांत्सर्वा श्छ्रुत्वाशक्रारिणाहतां सीताम् । यद्भक्तोगिरमूचेतंसन*रामम्॥ ॥ १०७१ ॥ मन्येहमयुक्त मिदं सीतांस्प्रष्टुंभवेत्सकिंशक्तः । इति यद्भक्तोऽभाणीत्तंसन * रामम् ॥१०७२॥ दशवदनोजीवेद्धातांप्राणेभ्योगरीयसींहत्वा । इति यद्भक्तोऽवादीत्तंसन* रामम् ॥ १०७३ ॥ युष्मान्संमोह्यैवं कर्तुंहोमं निकुंभिलांसययौ। इतियद्भक्तोऽवादीत्तंसन* रामम् ॥ १०७४ ॥ यद्युपयातोहूत्वाभवतिरणेसौ द्विषांदुराधर्षः। इति

यद्भक्तोवादीत्तंसन * रामम् ॥ १०७५ ॥ विघ्नमनिच्छन्यागेमायामे
तां प्रयोज्य सम्प्रययौ । इति यद्भक्तोऽवादीत्तंसन* रामम् ॥१०७६॥
स्वस्थमनाभवतुभवान्कपिभिः प्रेषयतुलक्ष्मणंतुमया। इतियद्भक्तोऽवा
दीत्तंसनका*रामम् ॥ १०७७ ॥ सौमित्रिस्तंविशिखैस्तत्कर्मत्याज-
यिष्यति क्षिप्रम् । इति यद्भक्तोऽवादीत्तं* रामम् ॥ १०७८॥ निहते
तस्मिन्विजयःप्राप्तोभवतेतिनिश्चयोभवति । इति यद्भक्तो * रामम् ॥
॥ १०७९ ॥ श्रुत्वेमांभक्तगिरंयोऽनुजमूचे वचस्तदाधृष्टः। स्वाश्रित-
रक्षणदीक्षं तंसन * रामम् ॥ १०८० ॥ ब्रह्मास्त्रज्ञंबलिनं तंजहिशत्रुं
निकुंभिलां गत्वा । इत्यवदत्सहजंयस्तंसन * रामम् ॥ १०८१ ॥
जांबवतासहकपिभिर्हनुमत्प्रमुखैर्जयाय गच्छत्वम्। इत्यवदत्सहजंयस्तं
सन * रामम् ॥ १०८२ ॥ भक्तोयंसामात्यस्त्वामनुयास्यत्यभिज्ञ
इत्युक्त्वा । अप्रेषयदनुजं यस्तंसन * रामम् ॥१०८३॥ अथकवची-
धृतचापःखड्गिप्रययौ विभीषणेनपुरीम् । अभिवन्द्यसयत्पदयोस्तंसन-
कादिस्तुतंभजे रामम् ॥ १०८४ ॥ भ्रातृकृतस्वस्त्ययनो हनुमत्प्रमुखै
र्युतःकपिश्रेष्ठैः । यदवरजोऽगाल्लङ्कां तंसन* रामम् ॥१०८५॥ राक्ष
ससैन्यव्यूहं दृष्ट्वासधनुर्विजेतुमरिमाजौ। तस्थौयस्यावरजस्तंसन*रामम्
॥ १०८६ ॥ एतैरक्षस्सैन्यैर्लक्ष्मणकपयोद्रुतं प्रयुध्यन्ताम् । इतियद्भ
क्तोऽभाणीत्तंसन * रामम् ॥ १०८७ ॥ व्यूहछेदेजाते कपिभिर्दृश्यो-
भवेत्तदेन्द्रारिः । इति यद्भक्तोऽभाणीत्तं सन * रामम् ॥ १०८८ ॥
अथ जहिरावणिमाजौ मायाविनमाशुतीक्ष्णशरवृन्दैः । इति यद्भक्तोऽ
वादीत्तंसन * रामम् ॥ १०८९ ॥ श्रुत्वा यद्भक्तवचस्सौमित्रिर्बाण-
वर्षमकरोद्द्राक् । शक्रारिंप्रतिकुपितस्तंसन* रामम् ॥१०९०॥ ऋक्षाः
कपयोजघ्नुर्यद्विट्सैन्यं गृहीततरु गिरयः । परितःस्थित्वाक्रुद्धास्तंसन *

रामम् ॥ १०९१ ॥ केचित्कपयो नखरैर्दशनैर्दण्डैर्दृपद्भिरथपादैः । यद्विट्सैन्यं जघ्नुस्तंसन * रामम् ॥१०९२॥ निहतान्राक्षससङ्घान्कपिभिर्ज्ञात्वा विहायकर्माधम् । उदतिष्ठद्यद्विड्भूस्तंसन * रामम् ॥ ॥ १०९३ ॥ अननुष्ठितकर्मान्तो यद्विट्पुत्रोनिकुंभिलां त्यक्त्वा । आभितोऽपश्यत्प्लवगांस्तंसन * रामम् ॥ १०९४ ॥ अथयद्दूतंपश्यन्राक्षससङ्घान्बहूनभिघ्नन्तम् । शक्रजिदूचेसूतंतंसन * रामम् ॥१०९५॥ यत्रास्माकंसैन्यंहन्तिकपिस्तत्रचोदयाशुरथम् । इति यद्विड्भूरवदत्तं* रामम् ॥ १०९६॥ अथतत्रोपेत्यशरां स्तीक्ष्णान्सन्धायधनुषियद्दूतम्। शक्रारि रहन्समरेतंसन * रामम् ॥ १०९७ ॥ तत्प्रक्षिप्तान्विशिखान्प्रासगदादीन्प्रगृह्यहस्ताभ्याम् । यद्दूतस्तमभाणीत्तंसन * रामम् ॥ ॥ १०९८ ॥ रेयदिशूरोसि त्वं युध्यस्वमयाद्यदुष्ट पापेति । यद्दूतस्तमभाणीत्तं सन * रामम् ॥१०९९॥ आसाद्यत्वंमांयुधिनैष्यसिजीवन्पुनःपुरींस्वीयाम् । इति यद्दूतोऽभाणीत्तंसन * रामम् ॥ ११०० ॥ बाहुभ्यांयुध्यस्वत्वं शूरश्चेन्मयाद्यदुष्टेति । यद्दूतस्तमभाणीत्तं*रामम्॥ ॥ ११०१ ॥ अथ रणभुविहनुमन्तंदृष्ट्वा शक्रारिणाप्रयुध्यन्तम् । यदनुजमाहसभक्तस्तं सनकादिस्तुतं भजे रामम् ॥ ११०२ ॥ त्वङ्गत्वाचेन्द्राजितंजहिविशिखैर्मर्म भेदिभिस्समये। इतिसयदवरजमूचेतंसन * रामम् ॥ ११०३ ॥ इतियद्भक्तेनोक्तस्सौमित्रिस्तद्युतो ययौ सधनुः। पवनजमाशुदिदृक्षुस्तं नत्यजचित्तमुक्तिदं रामम् ॥ ११०४॥ वृक्षछायानिबिडं देशंयद्भक्तदर्शितं भीमम् । सौमित्रिस्समपश्यत्तन्नत्यजचित्तमुक्तिदं रामम् ॥ ११०५॥ ज्ञात्वाथ वृत्तमखिलं यद्भक्तगिराऽरिमाशुविजिगीषुः। सधनुस्सौमित्रिरभूत्तं नत्यज * रामम् ॥११०६ ॥

15744 1572